CC-0. In Public Domain. Digitization by eGangotri

PUSPACINTĀMANI

पुष्पचिन्तामणिः

Edited by

Dr. Ja... ...shra

पुष्पचि...

Published by

His Majesty's Government of Nepal

Department of Archaeology

1966

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

PUṢPACINTĀMAṆI

(Flowers in Worship)

पुष्पचिन्तामणिः

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

॥ श्रीः ॥

पुष्पचिन्तामणिः

डॉ० श्रीजयमन्तमिश्रेण

('एम्० ए०, पी-एच० डी०' इत्युपाधिधारिणा, व्याकरण-साहित्याचार्येण,)

भारतीय-साहाय्य-नियोगे

त्रिभुवनविश्वविद्यालय संस्कृतप्राध्यापकेन

सम्पादितः

भारतीय-साहाय्य-नियोगे

नेपाल-सर्वकार-पुरातत्त्वविभागेन प्रकाशितः

१९६६

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

मुद्रक
विद्याविलास प्रेस, वाराणसी-१

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

PUṢPA-CINTĀMAṆI

(Flowers in Worship)

Edited by

DR. JAYAMANTA MIS'RA

M. A., Ph. D., Vyākaraṇa-Sāhityāchārya

Professor of Sanskrit, Tribhuvan University

(On deputation from the Government af India)

Published by

His Majesty's Government of Nepal

Department of Archæology

1966

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

A project financed from Indian aid to Nepal

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

CONTENTS

1. Foreword		11
2. Introduction (English)		13–19
3. Introduction (Sanskrit)		२१–२८

प्रथमप्रकाशे

पुष्पचिन्तामणेर्विषयाः	श्लो० सं०	पृ० सं०
१. मङ्गलाचरणम्	१	१
२. सामान्यतः पुष्पमाहात्म्यवर्णनम्	२–४	,,
३. सामान्यतः पुष्पविवरणम्	५–६	,,
४. सामान्यतः पुष्पदानफलम्	७–१५	२–३
५. शिवार्चने विहितानि पुष्पाणि	१६–२०	३–४
६. आत्मारामोद्भवशब्दविचारः		३
७. शिवार्चनपुष्पविषये उमेश्वरयोः संवादः	२१–२८½	४–५
८. मासविशेषे शिवार्चने पुष्पमाहात्म्ये उमेश्वरयोः संवादः	२६½–४३	५–६
९. पुष्पविशेषाणां फलानि	४४–४५	६
१०. एक पुष्पात् पुष्पान्तरवैशिष्ट्यम्	४६–५१	६–७
११. सहस्रनीलोत्पलमालादानफलम्	५२–५३	७
१२. पुष्पेषु परस्परसमता प्रतिपादनम्	५४–५६	,,
१३. सुगन्धिमालया लिङ्गपूजनफलम्	५७	,,

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

	श्लो० सं०	पृ० सं०
१४. विल्वपत्रेण लिङ्गपूजनफलम्	५८	८
१५. पुष्पविशेषेण लिङ्गपूजनफलम्	५६–७२	८–६
१६. वुकपुष्पेण पूजने विशिष्टफलम्	७३–७६	६
१७. शिवार्चने विहितपत्राणां प्रतिपादनम्	७७–८२	६–१०
१८. पुष्पदानप्रकारवर्णनम्	८३	१०
१६. पुष्पविषयेकालनिर्णयः	८४–८५	”
२०. काम्यपूजायां पुष्पविशेषफलम्	८६–११५	१०–१३
२१. शिवस्य नित्यपूजायां निषिद्धानि पुष्पाणि	११६–१२२½	१३–१४
२२. भक्त्यापूजने पुष्प-निषेधाभाव-कथनम्	१२३½–१२४½	१४
२३. उपहतपुष्पवर्णनम्	१२५½–१३१½	१४–१५
२४. पुष्पविशेषाणां भूगतादिदोषा-भावकथनम्	१३२	१५
२५. पुष्पपत्रादीनां दोषाभाववर्णनम्	१३३–१३६	१५-१६

द्वितीयप्रकाशे

१. विष्णुपूजने पुष्पदानफलम्	१–४	१७
२. विष्णुपूजायां शुभपुष्पवर्णनम्	५–८	”
३. विष्णुपूजने पुष्पविशेषाणां फलानि	६–१०	१७–१८
४. विष्णुपूजने एकस्मात् पुष्पात् पुष्पान्तर-वैशिष्ट्यकथनम्	११–१६	१८
५. सहस्रजातीपुष्पमालादानफलम्	२०–२२	१८–१६

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

	श्लो० सं०	पृ० सं०
६. विष्णुपूजने विहितपत्राणां वर्णनम्	२३–२६½	१८–१६
७. गौतमीयतन्त्रानुसारेण विष्णुपूजने पुष्पवर्णनम्	२७–३१	"
८. एतत् प्रकरणे बलिं प्रति प्रह्लाद-वचनम्	३२–३४½	२०
६. स्कन्दोक्तवैष्णवामृते हरिपूजने पुष्पविशेषदानफलम्	३५–५६	२०–२२
१०. विष्णुपूजायां निषिद्धानि पुष्पाणि	६०–६४	२२–२३
११. सूर्यपूजायां पुष्पदानफलवर्णनम्	६५–६६	२३
१२. सूर्यपूजायां पुष्पवैशिष्ट्यवर्णनम्	६७–७१	२३–२४
१३. सूर्यपूजने निषिद्धद्रव्यकथनम्	७२	२४
१४. पुष्पालाभे पत्रेण पूजाविधानम्	७३	"
१५. सूर्यपूजायां पुष्पविशेषवर्णनम्	७४–८१½	२४–२५
१६. सूर्यपूजायां कालविशेषे पुष्पदान-वर्णनम्	८२½	२५
१७. सूर्यपूजायां निषिद्धपुष्पवर्णनम्	८३–८४	"
१८. देवताविशेषपूजायां वस्तुविशेष-निषेधकथनम्	८५–८६	२५
१६. ग्रहाणां पूजने पुष्पविशेषवर्णनम्	८७–८८½	२६
२०. श्राद्धे विहितपुष्पाणि	८६–६०½	"
२१. श्राद्धे निषिद्धानि पुष्पाणि	६१½	"

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

	श्लो० सं०	पृ० सं०
तृतीयप्रकाशे		
१. दुर्गापूजायां पुष्पवर्णनम्	१–१०	२७
२. दुर्गापूजने पुष्पविशेषकथनम्	११–१६½	२८
३. मालालक्षणम्	१७–१८	"
४. रैक्षिकामालावर्णनम्	१६	"
५. साधारणीमालावर्णनम्	२०	"
६. वनमालावर्णनम्	२१	२६
७. मालाविषये विशेषकथनम्	२२–२५	"
८. पुष्पविशेषमालाफलवर्णनम्	२६–३३	२६–३०
९. अखण्डविल्वपत्रैर्देवीपूजनेफलम्	३४–३४½	३०
१०. मासविशेषे पुष्पार्चनविधानम्	३५–४०	३०-३१
११. कालविशेषे पुष्पविशेषकथनम्	४१	३१
१२. देवीपूजने निषिद्धपुष्पाणि	४२	"
१३. शिवादीनां पूजने निषिद्धपुष्प-प्रतिपादनम्	४३–४५½	३१–३२
१४. भक्त्या पूजने निषेधाभावकथनम्	४६½–४७½	३२
चतुर्थप्रकाशे		
१. सिंहासनविद्यायास्तन्त्रोक्तपुष्पविधानम् तत्फलवर्णनं च	१–१३	३३-३४
२. सिंहासनविद्यायाः पूजने निषिद्धपुष्प-कथनम्	१४–१६	३४
३. उत्तराम्नायानुसारेण पुष्पविधानम्	१७–२३	४३–३५

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

	श्लो० सं०	पृ० सं०
४. नैमित्तिकपूजायां पुष्पवर्णनम्	२४–३१½	३५–३६
५. काम्यपूजायां पुष्पवर्णनम्	३२–४५	३६–३७
६. अपराजितामाहात्म्यवर्णनम्	४६	३७
७. पुष्पादिद्रव्यमाहात्म्यवर्णनम्	४७–५०	३७–३८
८. देवीपूजने निषिद्धपुष्पवर्णनम्	५१	३८
९. दक्षिणकालीपूजने पुष्पादिवर्णनम्	५२–६०½	३८–३९
१०. देवीविशेष पूजने तुलसीविधानम्	६१½	३९
११. नीलसरस्वतीपूजने पुष्पविशेष माहात्म्य-कथनम्	६२–६८	३९–४०
१२. नीलसरस्वतीपूजायां निषिद्धपुष्पवर्णनम्	६९	४०
१३. त्रिपुरा पूजने ऊर्द्ध्वाम्नाये वर्णितानां पुष्पाणां माहात्म्यवर्णनम्	७०–७९	४०-४१
१४. ज्ञानार्णवे त्रिपुरापूजने वर्णितानां पुष्पाणां माहात्म्यकथनम्	८०–९०½	४१–४२
१५. तत्र निषिद्धपुष्पाणि	९१–९४	४२
१६. तत्प्रसङ्गे तुलसीपत्रविहिताविहितविचारः	९५	”

4. Digest 45

5. Index of the books quoted. 49

6. Index of the names of flowers. 51

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

सङ्केतः

मूलपुस्तकम्— ४५६ इति संख्याका पाण्डुलिपिः ।

(क) पुस्तकम्— ९६६ इति संख्याका पाण्डुलिपिः ।

(ख) पुस्तकम्— ३९२ इति संख्याका पाण्डुलिपिः ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

FOREWORD

I am highly pleased to know that the Nepal National Archives, first of its ktnd ever organised in Nepal, is publishing a classical work like 'Puṣpa-Cintāmaṇi' in the series "Prācya Vidyā Prakāśanamālā". Incidentally the subject matter of the manuscript gives detailed information about the flowers that are used in religious observances. Flowers are considered to be most auspicious in our religious and spiritual philosophy. The first thing that is supposed to be offered in any social or religious observance is beautiful flowers. I think 'Puṣpa-Cintāmaṇi' should be taken as a first flower submitted by the National Archives to those known or unknown people who are tirelessly working to bring many hidden and unexplored treasures to human knowledge.

I welcome it and thank its learned editor. I also congratulate the members of the Academic Committee of the National Archives Development Board and the Department of Archæology for their selection and timely publication of the manuscript.

Kathmandu,
30th July 1964,

Kirti Nidhi Bista,
Minister for Education,
His Majesty's Government of Nepal.

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

INTRODUCTION

It is a matter of great pleasure that the *Puṣpa Cintāmaṇi* or Flowers in Worship, which is like the fabulous gem, is now offered to the public. The book is intended to supply a long-felt want in regard to information on flowers to be used in worship. As the Cintāmaṇi gem is supposed to yield to its possessor all desires, similarly this *Puṣpa Cintāmaṇi* will meet the requirements of all those interested in the subject.

The present edition is based on the manuscripts of the work preserved in the Bir Library at Kathmandu, Nepal. There are six manuscripts of the *Puṣpa Cintāmaṇi*, of which only three are complete. One of these is written in Devanāgarī character and the remaining two in Newārī character. The incomplete ones are also in Newārī script. The manuscript No. 966 in Devanāgarī character is full of corrupt readings due to carelessness and ignorance of the copyist. The other two complete manuscripts Nos. 392 and 456, written in Newārī script, are almost correct. The carelessness of the scribes has made the editor's work rather difficult. On these manuscripts the present edition is based. The best of these Mss. (No. 456) was copied by a protege of the King Sumatijitāmitra Malla (1663–1696 A. D.), a famous ruler of the Malla dynasty in Nepal, when Bhāgirāma was the pradhāna in Nepal Saṁvat 810 (1690 A. D.). Another manuscript (No. 392) with a commentary in

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

Nevārī language was written by Daivajña Kulānanda and handed over to Upādhyāya Devānanda in Nepali Era 849 (1729 A. D.). The third one was scribed by Daivajña Dhana in Nepali Era 872 (1762 A. D.). The present edition is based on the three manuscripts mentioned above.

The *Puṣpa Cintāmaṇi* has been compiled, by incorporating the relevant passages from different *Tantras*, *Purāṇas*, *Mahābhārata*, *Mahākāla Saṁhitā*, *Puṣpa Mālā* etc. Like the four feet of Hindu Dharma there are four chapters (Prakāśas) in the book. Amongst the Tantras from which passages have been quoted, *Gautamīya Tantra*, *Gñānamālā Tantra*, *Manthāna Bhairava Tantra*, *Muṇḍamālā Tantra*, *Yāmala Tantra*, *Vāmakeśwara Tantra* and *Hāhārāva Tantra* are the principal ones. The *Kālikāpurāṇa*, *Devī Purāṇa*, *Nārasiṅa Purāṇa*. *Nāradīya Purāṇa*, *Bhaviṣya Purāṇa* *Matsya Purāṇa*, *Liṅga Purāṇa*, *Vāmana Purāṇa*, *Viṣṇu Purāṇa*, *Śiva Purāṇa* and *Skanda Purāṇa* are the principal Purāṇas quoted here. While discussing controversial matters here and there the text quotes the author of *Ācāra Cintāmaṇi* and Manu, Śātātapa, Hārīta and some others as authorities.

Regarding the worship of particular deities, general (Sāmānya) flowers are mentioned first and then the particular flowers favourite to the particular god have been arranged. It ls interesting to read here of the fiowers which are favourites of particular deities. Flowers not suited to particular deities are also mentioned as prohibited ones in their worship. The arrangements, arguments,

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

and discussions about these flowers have been made in the book according to the usual (Nitya), occasional (Naimittika) and optional (Kāmya) worships of deities. The good arising from the proper observance of the rules regarding this kind of use of flowers and the bad that results from not observing them have been set forth here.

In the first chapter firstly the importance of flowers in general, according to the Śivarahasya, is described. It is mentioned that the highest aim of human life (Caturvarga) can be achieved by worships through flowers :

“त्रिवर्ग-साधनं पुष्पं पुष्टि-श्री-स्वर्गमोक्षदम् ।” १, ३.

The first chapter describes flowers in general and in particular, the reward of offering particular flowers to particular deities in a particular month and the comparative merits of the flowers. It deals mostly with the flowers to be offered and prohibited in the worships of Śiva. For the inquisitive persons in regard to the worships of Śiva the first chapter provides material on many other matters.

The second chapter describes the flowers to be offered in the worship of Viṣṇu. Following the *Narasiṁha Purāṇa* and *Viṣṇu Purāṇa*, it deals with the matter, agreeing with the plan already adopted in the first chapter. In the worship of Viṣṇu Jāti, the jasmine, is the most praised flower :

“सर्वासां पुष्पजातीनां जातीपुष्पमिहोत्तमम् ।” 2, 19.

Following the *Vāmana Purāṇa* flowers fit for the worship of Viṣṇu, and those to be avoided are then described.

Similarly in the worship of the Sun flowers in general,

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

and those particular, appropriate and auspicious according to the *Bhaviṣya Purāṇa*, are mentioned. In this connection the *Puṣpa Mālā* of M. M. Rudradhara describes that one should not worship Viṣṇu with 'akṣata', Gaṇeśa with 'Tulasī', Durgā with 'Dūrvā' and the Sun with 'Vilwapatra':

"नाक्षतैरर्चयेद्विष्णुं न तुलस्या विनायकम् ।
न दूर्वया यजेद् दुर्गां विल्वपत्रैर्दिवाकरम् ॥" 2, 85.

At the end of the chapter the favourite flowers of the nine planets and the flowers suited to obsequial rites have been described.

In the third chapter, on the basis of data given in the *Devī* and *Bhaviṣya Purāṇas* there is a description of the three categories of flowers general, specific and auspicious, in the worship of the goddess Durgā. According to the *Mahākāla Saṁhitā* three kinds of wreaths viz., Raikṣikā, Sādhāraṇī and Vanamālā have been described and the merit of worship with these garlands is also mentioned.

In the same way, in the last chapter too, according to several Tantras, in the worship of Sinhāsana-Vidyā, Dakṣiṇa Kālī, Nīla Saraswatī and Tripura-Sundarī, the general, the specific and the especially auspicious flowers have been described and the prohibited ones also have been mentioned. The Vārāhī Tantra mentions that in the worship of Tripura-Sundarī, Tulasī-leaves should never be offered :

"त्रिपुरापूजने वर्ज्या तुलसी सर्वदा बुधैः ।" 4, 94.

In the Bir Library, there are also some other works, containing almost the same material, as the *Puṣpacintā-*

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

maṇi, viz., *Puṣpamālā*, *Puṣparahasya*, *Puṣpa Māhātmya*, *Puṣpa Nirūpaṇa Prakaraṇa*,* *Puṣpa Mālāstava*, *Puṣpa Vidhi* and *Puṣpa Ratnākara*.

The *Puṣpa Mālā* of M. M. Rudradhara is the oldest work, which describes, in short, the auspicious flowers for the worship of the Sun, Śiva, Pārvatī, Viṣṇu and Pitars and mentions the stale (Paryuṣita) flowers as well as the merits of the different flowers offered to the different deities.

The *Puṣpa-Rahasya* by Vidyānanda Nātha is a part of the *Rahasya Kallolinī*, containing an interesting description of the merits of offering the specific wreaths composed of the specific flowers to the specific deities. There is also a mention of certain specific offerings to the particular god on a particular day of the particular month.

Similarly in the Puṣpa Māhātmya also there is a description of flowers offered and prohibited in the usual, occasional and optional worship.

The *Puṣpa Nirūpaṇa Prakaraṇa*, which comes within the *Saubhāgya Ratnākara*, likewise, describes the things as mentioned above.

There is nothing new in the incomplete manuscripts of the *Puṣpamālā-stava*.

Puṣpavidhi, the shortest treatise on the subject, containing only four leaves, deals also briefly with the same, giving nothing new.

The *Puṣpa Ratnākara* of Navamī Singh consists of eight chapters (Patalas). In the first chapter there is

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

a description of flowers in general and in the second prohibitory flowers have been mentioned. Flowers offered in the worship of Gaṇeśa and Śiva are mentioned in the third while those offered in the Viṣṇu-worship constitute the theme of the fourth. Flowers used in the worship of the Sun and the other planets along with the flowers suited to the obsequial rites are described in the fifth. Similarly the flowers offered in the worship of Bhavānī, Durgā, Gāyatrī and Saraswatī form the subject matter of the sixth. The seventh and the last chapters describe the matters regarding the different flowers according to the Dakṣiṇāmnāya and Uttarāmnāya respectively.

After an analysis of the contents of the different manuscripts available in the Bir Library on the subject of flowers, I find that *Puṣpa-Cintāmaṇi* only contains an interesting and exhaustive treatment regarding the different aspects of flowers in worship.

As the Purāṇas, in this text too, there are some archaic forms like हिमवन्त सुते (1, 22), निर्भित्वा (1, 32), शिरोपरि (2, 39), भवते (2, 43), दुर्गायानुचरो भवेत् (3, 13, 24), स्रजोभिस्तु (3, 26–29, 31), आयुदम् (4, 6), त्रिलोकं वशगम् (4, 83), and so on. They have been given as they are and in the foot-notes the correct forms are indicated. Variant readings according to the mass. used have been given in the foot-notes. The verses have been numbered in every chapter though the numbers are not found in any of the manuscripts.

To add to the usefulness of this work two indices have been added at the end, one of the books quoted here and

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

the other of the names of flowers mentioned in this book with their meaning in Hindi and English.

I am extremely grateful to Shri S. S. Bhandarkar, Member (Education), Indian Aid Mission, Kathmandu, Nepal, who advised and inspired me to edit this book. I am also thankful to the Librarian, Bir Library, Kathmandu and other members of his staff who have fully co-operated with me while I was copying the manuscript for the present edition. I am also thankful to Dr. V. Raghavan, Professor of Sanskrit, University of Madras and "Member of the Academic Committee of the Nepal National Archives", Kathmadu, for going through the press-copy of the text and the introduction and offering useful suggestions.

J. Mishra

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

उपोद्घातः

अयि श्रद्धालवः समुपासकाः,

मानव-जीवनस्य परम-प्रयोजनानां धर्मार्थ-काम-मोक्षाणां साधनभूतं समुपासकानां चिन्तामणिं **पुष्पचिन्तामणिं** ग्रन्थं तत्रभवतां पुरतः समुपस्थापयन्तः परमामोदं लभामहे। आशास्महे च चतुर्वर्गस्य चतुःसोपानभूताः एतस्य **पुष्पचिन्तामणेः** चत्वारः प्रकाशाः साम्प्रतं प्रकाश्यमानाः सुमनसां मनसां सुमनोविषयक-विधि-निषेध-विचार-विधान-चिन्तां विधूय तेषां सुमनोमनांसि सुतरां विकासयिष्यन्ति नितरां प्रसादयिष्यन्ति चेति ।

नेपालस्थवीरपुस्तकालये **पुष्पचिन्तामणेः** सुरक्षितानां षण्णां पाण्डुलिपीनां मध्ये एका देवनागरीलिप्यामन्याश्च नेवारीलिप्यां सन्ति । एतासु द्वित्रास्तु खण्डिताः सर्वथा त्रुटिपूर्णाश्च । देवनागरी-लिपि-लिखिता ९६६ इति संख्याका पाण्डुलिपिस्तु लिपिकरस्य प्रमादात् तदज्ञानाधिक्याच्च पूर्णासु पाण्डुलिपिषु सर्वाधिकं संशयमादधाति पदे-पदेऽशुद्धतयाच चेतः खेदयति । ४५६ इति संख्याका ३९२ इति संख्याका च नेवारीलिपि-लिखिता पाण्डुलिपिरेव मुख्यतया प्रकृत-संस्करणस्य आधारभूता । उपलब्धासु समस्तासु पाण्डुलिपिषु श्रीश्री-सुमतिजयजितामित्रमल्लदेवमहाराजानां (१६६३–१६९६ ख्रीष्टाब्दे) काले मुख्यतया भागिरामप्रधानस्य समये ८१० इति नेपालसंवत्सरे

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

१६९० खीष्टाब्दे तेषां सत्प्रयासेन संगृहीतस्य अस्य ग्रन्थस्य कार्तिकशुक्ल-नवम्यां पूर्णतोलिखिता पाण्डुलिपिरेव प्रायेण शुद्धतमा। ८४९ इति नेपालसंवत्सरे १७२९ खीष्टाब्दे श्रावणशुक्लपूर्णिमायां मङ्गलवासरे दैवज्ञ-कुलानन्देन श्रीमदुपाध्यायदेवानन्दाय तदीयनिवासस्थाने समर्पिता इति संख्याका नेवारीभाषाटीका समन्विता पाण्डुलिपिरपि प्रायेण शुद्धा। देवनागरीलिप्यां दैवज्ञधनेन लिखितायाः पाण्डुलिप्याः समयस्तु ८७२ इति नेपालसंवत्सरस्य १७६२ इति खीष्टाब्दस्य च चैत्रमासः। प्रकृत-पुस्तकं संपिपादयिषुः उपर्युक्तानां त्रयाणां हस्तलिखित-पुस्तकानां साहाय्यमादाय एतत् समपादयम्। नेवारीलिप्यामेव ३९२ इत्येव संख्याका एका अपरा चापि पाण्डुलिपिः या सर्वासु प्राचीनतमा। एषा हि ७८१ इति नेपालसंवत्सरे (१६५१ इति खीष्टाब्दे) मार्ग-कृष्णद्वादश्यां बुधे विश्वेश्वरेण लिखिता। एतस्या अन्ते च—

"गते शरदि नेपाले चन्द्रनागाब्धिसंयुते।
द्वादश्यां मार्गकृष्णेऽमुं बुधे विश्वेश्वरोऽलिखत् ॥"

इत्येवमुपलभ्यते।

पुष्पचिन्तामणेः परिचयः

तन्त्र-पुराण-महाभारत-महाकाल-संहिताद्यनेकग्रन्थरत्नेषु यानि-पुष्पप्रकरणानि सन्ति तेभ्यस्तत्तत्प्रकरणविशेषमुद्धृत्य संगृहीतोऽयं **पुष्पचिन्तामणि**नामको ग्रन्थः। यस्मिन् धर्मस्य चत्वारश्चरणा इव चत्वारः प्रकाशाश्चकासतितराम्। उद्धृतप्रकरणेषु तन्त्रेषु एतानि प्रधानानि—गौतमीयतन्त्रम्, ज्ञानमालातन्त्रम्, मन्थानभैरवतन्त्रम्, मुण्डमालातन्त्रम्, यामलतन्त्रम्, वामकेश्वरतन्त्रम्, हाहारावतन्त्रं च।

उद्धृतप्रकरणेषु पुराणेषु च इमान्यधोलिखितानि प्रधानानि सन्ति—कालिकापुराणम्, देवीपुराणम्, नरसिंहपुराणम्, नारदीयपुराणम्,

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

भविष्यपुराणम्, मत्स्यपुराणम्, लिङ्गपुराणम्, वामनपुराणम्, विष्णुपुराणम्, शिवपुराणम्, स्कन्दपुराणं च ।

ग्रन्थमध्ये च यत्र तत्र वादात्मकेषु विषयेषु आचारचिन्तामणिकारस्य मनोः शातातपस्य हारीतस्य च वचनानि निर्णायकतया समुद्धृतानि प्रकाशन्तेतराम् ।

अत्र नित्य नैमित्तिक-काम्येषु त्रिविधेषु देवार्चनकर्मसु विहिताविहितानां पुष्पाणां विचारो वरीवर्ति । सामान्यपुष्पाणां विशेषपुष्पाणां च विचारस्तथा तत्तारतम्यम् तत्तत्प्रकरणे प्रतिपादितं वर्तते । मध्ये मध्ये प्रतिपादिताश्चार्थवादा उपासकानां मानसानि अतिशयेन मोदयन्ति समुत्साहयन्ति च ।

तत्र प्रथमप्रकाशे प्रारम्भे सामान्यतः पुष्पमाहात्म्यं शिवरहस्यानुसारेण लिखितं वर्तते । तत्र न केवलं पुष्पं त्रिवर्गसाधनम् अपितु मोक्षदमपीति प्रतिपादितम्,—"त्रिवर्गसाधनं पुष्पं पुष्टि-श्री-स्वर्गमोक्षदम् ।" १, ३ । ततः परं सामान्येन पुष्पाणां विवरणं शिवपुराणानुसारेण प्रतिपादितमस्ति । ततश्च भविष्यपुराणानुसारेण, शिवरहस्यानुसारेण, शिवधर्मसंग्रहानुसारेण च पुष्पदानफलं प्रतिपादितमस्ति । ततः शिवार्चने विहितानि पुष्पाणि वर्णितानि, मासविशेषे पुष्पविशेषदानस्य फलानि च प्रतिपादितानि सन्ति । ततश्च शिवधर्मानुसारेण पुष्पविशेषस्य फलं एकस्मात् पुष्पात् पुष्पान्तरस्य वैशिष्ट्यं च वर्णितं वर्तते । शिवार्चने "सर्वेषामेव पुष्पाणां प्रवलं नीलमुत्पलम्" (१, ५१) इति वचनात् नीलोत्पलं विशिष्टतमत्वेन निर्णीतम् । एवं च यो हि सहस्रनीलोत्पलमालया शङ्करं पूजयति स कल्पकोटिसहस्राणि शिवतुल्यपराक्रमः शिवपुरे निवसति (१, ५२, ५३) । शिवधर्मानुसारेण सुगन्धिमालया यस्तु शिवलिङ्गमर्चयति सोऽनन्तफलमश्नुते । यो हि

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

अखण्डैर्बिल्वपत्रैः सकृल्लिङ्गं प्रपूजयति स शिवलोके महीयते (१, ५८)। एवमेव पुष्पविशेषेण पूजाफलं वर्णितं चकास्ति।

न केवलं पुष्पाणां पत्राणामपि लिङ्गपुराणानुसारेण शिवपूजनेऽतीव माहात्म्यं विद्यते। सकामशिवपूजाविधौ पुष्पविशेषस्य फलविशेषवर्णनं तु अतीव रोचकम्। ततश्च शिवधर्मानुसारेण शिवपूजने निषिद्ध-पुष्पाणामपि उल्लेखो वर्तते। तत्रैव उपहत-पर्युषितादि-पुष्पाणां वर्णनमपि जिज्ञासूनां कृते विस्तरेण कृतमस्ति।

द्वितीयप्रकाशे च नरसिंहपुराणानुसारेण च विष्णुपूजनमाहात्म्यम्, विष्णुपुराणानुसारेण पुष्पविशेषवर्णनम्, नरसिंहपुराणानुसारेण च पुष्पविशेषाणां-फलानि प्रतिपादितानि राजन्तेतराम्। तत्र "सर्वासां पुष्पजातीनां जातीपुष्पमिहोत्तमम्" (२, १९) इति कथनात् विष्णु-पूजने जातीपुष्पस्य श्रेष्ठत्वम्। यो हि सहस्रजातीपुष्पमालया विष्णुं पूजयति स कल्पकोटिसहस्राणि विष्णुतुल्यपराक्रमो विष्णुपुरे निवसति (२, २०, २१)। ततश्च वामनपुराणानुसारेण केशवार्चने प्रशस्त-कुसुमानां वर्णनं विद्यते। ततो मास-विशेषे पुष्पविशेषेण विष्णुपूजन-फलम् विष्णुपूजायां निषिद्धकुसुमानां कथनं च विद्यते।

सूर्यस्य पूजायां विहितानां प्रशस्तानां विशिष्टानां च पुष्पाणां वर्णनं भविष्यपुराणानुसारेण महामहोपाध्यायरुद्रधरकृतपुष्पमालानुसारेण च वर्तते। तत्रैव पुष्पनिषेधप्रकरणे—

"नाक्षतैरर्चयेद्विष्णुं न तुलस्या विनायकम्।
न दूर्वया यजेद् दुर्गां बिल्वपत्रैर्दिवाकरम्॥" २, ८५

इत्यपि यामलतन्त्रानुसारेण कथितमस्ति।

ग्रहाणां पूजने पुष्पविशेषाणां वर्णनं तथा पितॄणां श्राद्धे विहिता-विहितानां कुसुमानां-प्रतिपादनं च वरीवर्ति।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

तृतीयप्रकाशे एवमेव दुर्गायाः पूजने देवीपुराणानुसारेण भविष्य-पुराणानुसारेण च सामान्यानां विशिष्टानां च पुष्पाणां वर्णनं कृतमस्ति। ततो मालालक्षणं महाकालसंहितानुसारेण वर्णितं विद्यते यत्र रैक्षिका साधारणी वनमालेति त्रिविधासु मालासु वनमालाया माहात्म्यं श्रेष्ठत्वं च वर्णितम् । तत्रैव पुष्पविशेषमालया दुर्गाया अर्चने फलविशेषकथन-मपि अतीव रोचकम् । देवीपुराणानुसारेण मासविशेषे पुष्प-विशेषेण पूजने फलविशेषकथनं देवीपूजने निषिद्धपुष्पप्रतिपादनं च कृतमस्ति ।

चतुर्थप्रकाशे च प्रारम्भे भगवत्याः सिंहासनविद्यायाः पूजायां पश्चिमाम्नायस्य मन्थानभैरवतन्त्रोक्त-विधिना पुष्पविधानम्, निषिद्ध-पुष्पप्रतिपादनं च कृतम् । ततः परमुत्तराम्नायस्य महाकाल-संहितायां वर्णितानां सामान्य-विशेषाणां पुष्पाणां प्रतिपादनमतीव मनोरञ्जकम् । ततश्च नैमित्तिके काम्ये च देव्याः पूजने सामान्य-विशेष-कुसुमानां-हाहारावतन्त्रानुसारेण भावचूडामण्यनुसारेण च वर्णनं महाकालसंहितानुसारेण निषिद्धकुसुमानां प्रतिपादनं च वर्तते। एवमेव दक्षिणकाल्याः पूजने कालीतन्त्र-मुण्डमालातन्त्र-शक्तियामल-तन्त्रानुसारेण, नीलसरस्वत्याः पूजायां नीलतन्त्रानुसारेण पुष्पमाहात्म्यं वर्णितं विद्यते । त्रिशक्तिरत्ने कुलचूडामणौ च देवीपूजायां प्रतिपादि-तानां निषिद्धानां पुष्पाणां वर्णनमस्ति । ततःपरमूर्द्ध्वाम्नायस्य वाम-केश्वरतन्त्रानुसारेण ज्ञानार्णवानुसारेण च देव्याः पूजने पुष्पविशेषदानफलं निषिद्धपुष्पप्रतिपादनं च कृतमस्ति । एवमेव वाराहीतन्त्रे कोलालवीये च त्रिपुरसुन्दरीपूजने तुलसीनिषेधप्रतिपादनप्रसङ्गे—

"त्रिपुरापूजने वर्ज्या तुलसी सर्वदा बुधैः ।
तुलसीघ्राणमात्रेण क्रुद्धा भवति सुन्दरी ॥" (४, ९४)

इत्यपि प्रतिपादितं वर्तते । भैरवी-सुन्दरी-तारा-पूजाप्रसङ्गे ब्रह्म-विष्णु-

४

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

सूयणामपि पूजने तुलसी वर्जितैव पूजा सफला भवति इत्यपि चान्ते-प्रतिपादितम् ।

वीरपुस्तकालये पूजा-पुष्प-विषयकाणामन्येषां **पुष्पमाला-पुष्प-रहस्य-पुष्पमाहात्म्य-पुष्पनिरूपणप्रकरण-पुष्पमालास्तव-पुष्प-विधि-पुष्परत्नाकरे**तिनामकानां सप्तानां पुस्तकानामपि पाण्डुलिपयः सुरक्षिताः सन्ति ।

एतेषु पुस्तकेषु महामहोपाध्यायरुद्रधरस्य **पुष्पमाला** प्राचीन-तमा यस्यां सूर्य-गौरीशङ्कर-हरि-पितृ-पूजासु विहितानां सामान्य-विशेष-प्रशस्तानां च पुष्पाणां विवरणं वरीवर्ति । श्रीविद्यानाथेन संकलिते **रहस्यकल्लोलिन्य** न्तर्गते**पुष्परहस्ये** देवविशेषपूजायाम् पुष्प-विशेषरचितायाः दानफलं, मालायाः कालविशेषे पुष्पविशेषेण देवपूजन-फलं च वर्णितं वर्तते । एवमेत्र च अन्वर्थनामके **पुष्पमाहात्म्ये** नित्यनैमित्तिक-काम्य-पूजनेषु विहिताविहित-पुष्प-विवरणं विद्यते ।

सौभाग्यरत्नाकरोद्धृते पुष्पनिरूपण-प्रकरणे, अपूर्णे **पुष्पमाला-स्तवे** तथा चतुष्पत्रात्मकेऽतिसंक्षिप्ते **पुष्पविधौ** न किमपि नूतनम् ।

नवमीसिंहस्य **पुष्परत्नाकरे** अष्टौपटलाः सन्ति तत्र प्रथमे पटले सामान्यपुष्पविवरणं, द्वितीयये निषिद्धपुष्पकथनं, तृतीये शिव-गणेशार्चने विहितपुष्प-प्रतिपादनं, चतुर्थे विष्णोरर्चने विहित-पुष्प-वर्णनं, पञ्चमे आदित्य ग्रह-पितॄणां-पुष्पविवरणं, षष्ठे भवानी-दुर्गा-गायत्री-सरस्वतीनां पुष्प-प्रतिपादनं, सप्तमे दक्षिणाम्नायानुसारेण पुष्पवर्णनम् अन्तिमेचाष्टमे पटले उत्तरोर्ध्वाम्नायानुसारेण पुष्पविवरणं विद्यते ।

पुष्पविषयकाणामुपरिनिर्दिष्टानां वीरपुस्तकालयस्थपाण्डुलिपीनाम-ध्ययनानन्तरम् इति सुस्पष्टं भवति यत् पुष्पचिन्तामणिनामको ग्रन्थएव आकारमहत्त्वात् विशेषेण विषयप्रतिपादनाच्च सर्वातिशायी ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

एतस्य ग्रन्थस्थ पुराणाद्युद्धृतप्रकरणेषु यद्यपि 'हिमवन्तसुते (१, २२)', 'निर्भित्वा (१, ३२)', 'शिरोपरि (२, ३९)', 'भवते (२, ४३)', 'दुर्गायानुचारो भवेत् (३, १३, २४)', 'स्रजोभिस्तु (३, २६-२९, ३१)', 'आयुदम् (४, ६)' 'त्रिलोकं-वशगम् (४, ८३)' इत्यादीनि पदानि अपाणिनीयानि सन्ति, तथापि "यान्युज्जहार माहेन्द्राद् व्यासो व्याकरणार्णवात्। पदरत्नानि किं तानि सन्ति पाणिनि गोष्पदे ॥" इति महाभारतटीकायां देवबोधोक्त-वचनं स्मारं स्मारं मूले तान्येव पदानि पाठ्यतया स्थापितानि यत्र च विभिन्नाः पाठाः उपलब्धास्तत्र पाठान्तरमपि नीचैः प्रदत्तम् पाण्डु-लिप्यां श्लोकानां संख्यानामभावेऽपि अत्र प्रत्येकं प्रकाशः श्लोकसंख्याभिः सनाथीकृतः। पुस्तकस्यास्य सम्यगुपयोगिताप्रवृद्धये चान्ते ग्रन्थेऽस्मिन् निर्दिष्टानामुद्धृत प्रकरणानां च ग्रन्थानां सूच्या प्रकृतग्रन्थे निर्दिष्टानां-पुष्पाणामर्थसहितया शब्दानुक्रमणिकया च पुस्तकरत्नमिदं सनाथी-कृतम्।

नेपालस्थ भारतीयसाहाय्यनियोगस्य सम्मान्य-शिक्षा-सदस्यानां श्री भण्डारकरमहोदयानामतीव कृतज्ञोऽस्मि येषां समुत्साहेन सौहा-र्देन च अस्यग्रन्थस्य सम्पादनं कर्तुमशकम्। वीरपुस्तकालयाध्यक्ष-महोदया अन्ये च तत्रत्याः कार्यकर्तारो धन्यवादार्हायेषां सौहार्देन सहयोगेनचास्य सम्पादनं समभवत्। विशिष्य मद्रपुर-विश्वविद्यालय-संस्कृत विभागाध्यक्षेभ्यः डाक्टर वि० राघव महाशयेभ्यः स्वकीयं कार्तज्ञं निवेदयामि येषां बहुमूल्यनिर्देशं प्रापमेतत् प्रकाशने।

कियत्यापि सावधानतया सम्पादितपुस्तकं विशेषतः प्रथमसंस्क-रणं प्रमादज्ञानाच्च न भवति सर्वथा त्रुटिरहितमितिसामान्य-नियमस्य कथं स्यादिदमपवादरूपम्, तथापि विश्वसिमि—

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

गुणज्ञान् सुधियो धीरान् श्रद्धालून् समुपासकान् ।
माहात्म्यं ग्रन्थरत्नस्य सन्तोषेण सुयोजयेत् ॥ इति ।

'आपरितोषाद्विदुषां न-साधुमन्ये प्रयोगविज्ञानम्' इति कालिदासीय-वचनं स्मारं स्मारं प्रकृतसंस्करणस्य गुणदोषादि-विवेचने गुणैकपक्षपातिनो विपश्चित एव प्रमाणीकरोति—

विदुषां वशंवदः,

जयमन्तमिश्रः

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

ओम् नमः श्रीगणेशाय नमः

श्रीपुष्पचिन्तामणिः

अथ प्रथमः प्रकाशः

कामदं कामदं नत्वा नीत्वा मतिमतां मतम् ।
पुष्पचिन्तामणिं कुर्वे वाञ्छितार्थनिकेतनम् ॥ १ ॥

तत्रादौ सामान्यतः पुष्पमाहात्म्यं लिख्यते ।

तदुक्तं शिवरहस्ये—

पुष्पैर्देवाः प्रसीदन्ति पुष्पे देवाश्च संस्थिताः ।
किञ्चातिबहुनोक्तेन पुष्पस्योक्तिमतन्द्रिकाम्[1] ॥ २ ॥
परं ज्योतिः पुष्पगतं पुष्पेणैव प्रसीदति ।
त्रिवर्गसाधनं पुष्पं पुष्टि-श्री-स्वर्गमोक्षदम् ॥ ३ ॥
पुष्पमूले वसेद् ब्रह्मा पुष्पमध्ये च केशवः ।
पुष्पाग्रे च महादेवः सर्वदेवाः स्थिता दले ॥ ४ ॥

अथ सामान्यतः पुष्पविवरणम् । शिवपुराणे—

देवानां शुक्लपुष्पं तु दुर्गन्धं दानवास्तथा ।
कर्कशं लोहितं चैव राक्षसानां प्रकीर्तितम् ॥ ५ ॥
उद्धृतं वाप्यवेलायां पुष्पं त्वन्येन पुष्पितम् ।
तत् पुष्पं तु पितॄणां स्यात् सत्यं देवि ब्रवीम्यहम् ॥ ६ ॥

---

१. अमन्दिकाम् इति ख० पुस्तके ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

अथ सामान्यतः पुष्पदानफलम् । **भविष्यपुराणे—**

तपःशीलगुणोपेत-पात्रे वेदस्य पारगे ।
दश दत्त्वा सुवर्णानि यत् फलं कुसुमेषु तत् ॥ ७ ॥

शिवधर्मसंग्रहे—

दशसौवर्णिकं पुष्पं निर्गन्धि यदि भामिनि ।
शतसाहस्त्रिकामाला अनन्तं लिङ्गपूजने[1] ॥ ८ ॥
निर्गन्धिकुसुमस्यापि विधिः ख्यातो द्विजोत्तमाः ।
शोभनैर्दिव्यगन्धाद्यैः शृणु तत्र तु यत् फलम् ॥ ९ ॥
एकपुष्पप्रदानेन लिङ्गेषु प्रतिमासु वा ।
अशीतिकल्पकोटीनां दुर्गतिं न नरो व्रजेत् ॥ १० ॥
यस्य वृक्षस्य पुष्पाणि पत्राणि च फलानि च ।
महादेवाय युक्तानि सोऽपि गच्छेत् परां गतिम् ॥ ११ ॥
स्वयमुत्पाद्य पुष्पाणि यः स्वयं पूजयेच्छिवम् ।
तानि साक्षात् प्रगृह्णाति भक्तितः सततं शिवः ॥ १२ ॥
प्रत्येकमुक्तपुष्पाणां दशसौवर्णिकं फलम् ।
सन्निबद्धेषु[2] तेष्वेव द्विगुणं फलमिष्यते ॥ १३ ॥

सुवर्णपरिमाणमाह । **भारते—**

पञ्चकृष्णलको माषः सुवर्णस्तेषु षोडश ।

कृष्णलको गुञ्जा । तेन सहस्रपुष्पदाने दशसहस्रसुवर्णदानफलम् । सहस्रपुष्पाणां मालादाने विंशतिसहस्रसुवर्णदानफलावाप्तिरित्यर्थः ।

---

१. लिङ्गपुराणे इति क० पुस्तके ।
२. अन्निबद्धेषु इति क० पुस्तके ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

शिवरहस्ये—

पुष्पैः पञ्चभिरप्यत्र पूजयित्वा महेश्वरम् ।
दशानामश्वमेधानां फलं प्राप्नोति पूरुषः ॥ १४ ॥
अष्टभिर्वा शिवं पुष्पैरभ्यर्च्य विधिना नरः ।
प्रयाति शाङ्करं धाम किं पुनर्यैः सहस्रशः ॥ १५ ॥

अथ शिवार्चने पुष्पनिर्णयः । तच्च द्विविधम् । विहितं निषिद्धं चेति । तदुक्तं **शिवरहस्ये**–

कानिचिद्विहितानीह निषिद्धानि च कानिचित् ।
पुष्पाणीति विशेषः । निषिद्धविहितमिति केचित् ।

तत्रादौ शिवे विहितानि निरूप्यन्ते । **शिवधर्मे—**

पुष्पैररण्यसम्भूतैः पत्रैर्वा गिरिसम्भवैः ॥ १६ ॥
अपर्युषित-निश्छिद्रैः प्रोक्षितैर्जन्तुवर्जितैः ।
आत्मारामोद्भवैर्वापि भक्त्या सम्पूजयेच्छिवम् ॥ १७ ॥

आत्मारामोद्भवैरिति । आत्मैवाराम उपवनं–तस्मादुद्भवैर्मानसपुष्पैरिति केचित् । तन्न, एतत् पुष्पविवेचनप्रकरणविरोधात् । परकीयारामोद्भवैर्निषेधदर्शनाच्च । तदुक्तं—

नारदीय-राक्षसीशंपथे[1]—

पारक्यारामजातैस्तु कुसुमैरर्चयेत् सुरान् ।
तेन पापेन लिप्यामि यद्येतदनृतं वदे[2] ॥ १८ ॥

अतएवारामोद्भवैः स्वकीयोपवनोद्भवैरित्यर्थः । तदभावे चौर्यमप्यदोषः । 'देवतार्थं च कुसुममस्तेयं मनुरब्रवीत्' इत्यभिधानात् । किञ्च—

---

१. राक्षसी शंपथे इति पुस्तके ।

२. वदेत् इति मातृकासु । श्लोकोऽयं 'वेंकटेश्वर' यन्त्रालयात् प्रकाशिते नारदीयपुराणे उत्तरखण्डे २७ तमेऽध्याये राक्षसीशपथे नोपलभ्यते ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

नित्यदेवार्चने पुष्पे न दोषः क्रयचौर्ययोः ।
प्रार्थितेन प्रसूनेन सर्वं तन्निष्फलं भवेत् ॥ १९ ॥

अत्र शिवपूजायां स्वकीयारामोद्भवपुष्पं वन्यपुष्पाभावे ग्राह्यम् वा-शब्दग्रहणात् वन्यपुष्पप्राशस्त्यश्रवणाच्च । तदुक्तं

शिवगीतायाम्—

वन्येषु यादृशी प्रीतिर्वर्तते परमेशितुः ।
उत्तमेष्वपि नास्त्येव तादृशी ग्रामजेष्वपि ॥ २० ॥

उत्तरोत्तरेऽपि ।

श्री उमोवाच—

यत् त्वया कथितं सर्वमर्चनं पूजनं तथा ।
पुष्पाणां च विधानं तु एतदाख्यातुमर्हसि ॥ २१ ॥

श्री ईश्वर उवाच—

हिमवन्तसुते[1] सत्यं पुष्पाणां च यशस्विनि ।
यानि मे देवि रोचन्ते कथयामि विशेषतः ॥ २२ ॥
करवीरो वुकश्चैव अर्क उन्मत्तकस्तथा ।
पाटला बृहती चैव तथैव गिरिकर्णिका ॥ २३ ॥
अशोकं शङ्खपुष्पाणि मन्दारश्चापराजिता ।
शमीपुष्पाणि चान्यानि कुब्जकः शिखिनी तथा ॥ २४ ॥
अपामार्गस्तथा पद्मं जातीपुष्पं सकोकनम् ।
चम्पकोशीरतगरं तथा वै नागकेशरम् ॥ २५ ॥
पुन्नागं किङ्किरातं च द्रोणपुष्पं तथा शुभम् ।
शिंशापोदुम्बरं चैव जया मल्ली तथैव च ॥ २६ ॥

---

१. नगाधिपसुते इति तु युक्तः पाठः ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

पुष्पाणि यज्ञवृक्षस्य विल्वपत्रं तथा शुभम् ।
कुसुम्भस्य च पुष्पाणि तथा वै कुङ्कुमस्य च ॥ २७ ॥
नीलं च कुसुमं चैव तथा रक्तोत्पलानि च ।
सुरभीणि च सर्वाणि स्थलजान्यम्बुजानि च ॥ २८ ॥
गृह्णामि शिरसा देवि यो मे भक्त्या प्रयच्छति ॥ २८½ ॥

श्री उमोवाच—

केषु केषु च पुष्पेषु प्रभो कर्तुः[1] स्पृहा तव ।
मासिकानि तु पुष्पाणि शुभानि कथयस्व मे ॥ २९½ ॥

श्री ईश्वर उवाच—

पृष्टोऽहं यत्त्वया देवि मम कौतूहलं हि तत् ।
कथयामि प्रयत्नेन लोकानां हितकाम्यया ॥ ३०½ ॥
आषाढस्य तु मासस्य स्नात्वा कृष्णचतुर्दशी ॥ ३१ ॥
सकृच्च गुग्गुलं दग्ध्वा दत्त्वा पुष्पसकुण्डिकाम् ।
निर्भित्त्वा[2] ब्रह्मलोकेषु तेऽपि यान्ति पराङ्गतिम् ॥ ३२ ॥
श्रावणस्य तु मासस्य एकाहारेण यो जनः ।
अर्चयेत् करवीरेण गोसहस्रफलं लभेत् ॥ ३३ ॥
भाद्रपदस्य मासस्य अपामार्गेण योऽर्चयेत् ।
हंसध्वजेन युक्तेन विमानेन स गच्छति ॥ ३४ ॥
आश्वयुजस्य मासस्य अर्कपुष्पैस्तु योऽर्चयेत् ।
मयूरध्वजयुक्तेन विमानेन स गच्छति ॥ ३५ ॥
कार्तिकस्य तु मासस्य क्षीरेण स्नापयेन्मम ।
अर्चयेज्जातिपुष्पैस्तु शिवं पश्यन्निरञ्जनम् ॥ ३६ ॥

---

१. भर्तुः इति ख पुस्तके ।
२. निर्भिद्य इति युक्तम् ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

मार्गशीर्षस्य मासस्य बुकेनार्चयते पुनः ।
स त्रैलोक्यमतिक्रम्य यत्राहं तत्र गच्छति ॥ ३७ ॥

पौषस्यैव तु मासस्य धुस्तूरेण तु योऽर्चयेत् ।
तुष्टेन स मया देवि लभते परमं पदम् ॥ ३८ ॥

माघस्यैव तु यो देवि हरं बिल्वेन अर्चयेत् ।
बालार्कशरियुक्तेन विमानेन स गच्छति ॥ ३९ ॥

फाल्गुनस्य तु मासस्य गन्ध-तोयेन स्नापयेत् ।
अर्चयेद् द्रोणपुष्पेण इन्द्रस्यार्द्धासनं लभेत् ॥ ४० ॥

चैत्रे चैव ततो मासि नृत्यगीतेन शंकरम् ।
योऽर्चयेद् दर्भपुष्पेण लभेद् बहु सुवर्णकम् ॥ ४१ ॥

वैशाखस्य च मासस्य घृतेन स्नापयेत् सदा ।
अर्चयेच्छुक्लमन्दारै रश्वमेधफलं लभेत् ॥ ४२ ॥

ज्येष्ठमासि ततो दध्ना स्नापयेत् सततं नरः ।
अर्चयेत् पद्मपुष्पेण सोऽपि गच्छेत् परां गतिम् ॥ ४३ ॥

अथ पुष्पविशेषाणां फलानि । **शिवधर्मे—**

अर्कस्य पुष्पमेकं च यः शिवाय निवेदयेत् ।
दश दत्त्वा सुवर्णानि यत् फलं तदवाप्नुयात् ॥ ४४ ॥

एवं पुष्पविशेषेण फलं तदधिकं भवेत् ।
ज्ञेयं पुष्पान्तरज्ञेन यथा स्यात्तं निबोध मे ॥ ४५ ॥

अर्कपुष्पसहस्रेभ्यः करवीरं विशिष्यते ।
करवीरसहस्रेभ्यो बिल्वपत्रं विशिष्यते ॥ ४६ ॥
बिल्वपत्रसहस्रेभ्यः पद्मपुष्पं विशिष्यते ।
पद्मपुष्पसहस्रेभ्यो बुकपुष्पं विशिष्यते ॥ ४७ ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

बुकपुष्पसहस्रेभ्य एकं धुत्तूरकं परम् ।
धुत्तूरकसहस्रेभ्यो बृहत्पुष्पं विशिष्यते ॥ ४८ ॥
बृहत्पुष्पसहस्रेभ्यो द्रोणपुष्पं विशिष्यते ।
द्रोणपुष्पसहस्रेभ्यः अपामार्गं विशिष्यते ॥ ४९ ॥
अपामार्गसहस्रेभ्यः कुशपुष्पं विशिष्यते ।
कुशपुष्पसहस्रेभ्यः शमीपुष्पं विशिष्यते ॥ ५० ॥
शमीपुष्पसहस्रेभ्यः श्रीमन्नीलोत्पलं परम् ।
सर्वेषामेव पुष्पाणां प्रवलं नीलमुत्पलम् ॥ ५१ ॥
नीलोत्पलसहस्रेण यो मालां संप्रयच्छति ।
शिवाय विधिवद् भक्त्या तस्य पुण्यफलं शृणु ॥ ५२ ॥
कल्पकोटिसहस्राणि कल्पकोटिशतानि च ।
वसेच्छिवपुरे नित्यं शिवतुल्यपराक्रमः ॥ ५३ ॥
शेषाणां पुष्पजातीनां यत् फलं परिकीर्तितम् ।
स तत्फलानुसारेण शिवलोके महीयते ॥ ५४ ॥
शमीपुष्पं बृहत्याश्च कुसुमं तुल्यमुच्यते ।
करवीरसमा ज्ञेया जातीविजयपाटलाः ॥ ५५ ॥
श्वेतमन्दारकुसुमं सितपद्मेन तत् समम् ।
नागचम्पक-पुन्नागा धुस्तूरकसमाः स्मृताः ॥ ५६ ॥

[तथा शिवधर्मसंग्रहे—

नास्ति पापसमः शत्रुर्न च धर्मसमः सखा ।
न च रुद्रात् परा देवा न पुष्पं कनकादपि ॥ १ ॥]

शिवधर्मे—

मालाभिर्वा सुगन्धाभिर्यो लिङ्गं पूजयेन्नरः ।
सवेदिकाविशेषेण सोऽनन्तफलमश्नुते ॥ ५७ ॥

---

१. कोष्ठान्तर्गतपाठः सर्वेषु पुस्तकेषु नास्ति ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

विल्वपत्रैरखण्डैश्च सकृल्लिङ्गं प्रपूजयेत् ।
सर्वपापविनिर्मुक्तः शिवलोके महीयते ॥ ५८ ॥
धुस्तूरकैश्च यो लिङ्गं सकृत् पूजयते नरः ।
स गोलक्षफलं प्राप्य लभते परमं पदम् ॥ ५९ ॥
वृहतीकुसुमैर्भक्त्या यो लिङ्गं सकृदर्चयेत् ।
गवामयुतदानस्य फलं प्राप्य शिवं व्रजेत् ॥ ६० ॥
मल्लिकोत्पलपद्मानि जातीपुन्नागचम्पकम् ।
अशोक-श्वेत-मन्दार-कर्णिकार-बुकानि च ॥ ६१ ॥
करवीरा-र्कमन्दार-शमी-तगर-केशराः ।
कुशा-पामार्ग-कुमुदं कदम्ब-द्रोणजैरपि ॥ ६२ ॥
पुष्पैरेतैर्यथालाभं यो नरः पूजयेच्छिवम् ।
स यत् पुण्यमवाप्नोति तदेकाग्रमनाः शृणु ॥ ६३ ॥
सूर्यकोटिप्रतीकाशैर्विमानैः सर्वकामदैः ।
पुष्पमालापरिक्षिप्तैर्गीत-वादित्रनिस्वनैः ॥ ६४ ॥
तन्त्रैर्मधुरवादैश्च स्वच्छन्दं गगनालये ।
रुद्रकन्यासमाकीर्णैर्देवदानवदुर्लभैः ॥ ६५ ॥
उद्धूयमानश्चमरैः स्तूयमानः सुरासुरैः ।
स गच्छति पुरं दिव्यं यत्र वा रुचितं भवेत् ॥ ६६ ॥
यैस्तैर्वापीह कुसुमैर्जलस्थलरुहैः शिवम् ।
संपूज्य प्रोक्षितैर्भक्त्या शिवलोके महीयते ॥ ६७ ॥
शिवस्योपरि यः कुर्यात् सुघनं पुष्पमण्डनम् ।
शोभितं पुष्पस्रग्दामैरापीठान्तं प्रलम्बिभिः ॥ ६८ ॥
अत्याश्चर्यैर्महायानैर्दिव्यपुष्पोपशोभितैः ।
सर्वैः परिचितैः श्रीमानास्ते शिवपुरे सुखी ॥ ६९ ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

अनेकाकारसंयुक्तं यः शिवे कुसुमं गृहम् ।
कुर्वीत पर्वकालेषु विचित्रकुसुमोज्ज्वलम् ॥ ७० ॥
स पुष्पक-विमानेन सहस्र-परिवारितः ।
दिव्यस्त्रीसुखसम्भोग-क्रीडारतिसमन्वितः ॥ ७१ ॥
अक्षयं मोदते कालमतिरस्कृतशासनः ।
शिवादिसर्वलोकेषु यत्रेष्टं तत्र याति सः ॥ ७२ ॥

शिवधर्मसंग्रहे—

सकृद् दत्ते वुके देवि गोसहस्रफलं लभेत् ।
पक्षेण योगी भवति मासेन तु दिवं व्रजेत् ॥ ७३ ॥
मासद्वयेन चाप्नोति क्रतूनां फलमुत्तमम् ।
त्रिभिर्मासैः प्रपद्येत ब्रह्मलोकमनुत्तमम् ॥ ७४ ॥
चतुर्भिः सिद्धिमाप्नोति योगसिद्धिं च पञ्चभिः ।
षण्मासेन नरो याति रुद्रलोकं न संशयः ॥ ७५ ॥
रुद्राकृतिधरो भूत्वा चन्द्रार्द्धकृतशेखरः ।
प्रयाति वृषयानेन द्वितीय इव शूलधृक् ॥ ७६ ॥

अथ शिवे विहितपत्राणि ।

लिङ्गपुराणे—

विल्वपत्रं शमीपत्रं भृङ्गराजस्य पत्रकम् ।
अटरूषस्य पत्रं च पत्रं शिंशुकचोलिकम् ॥ ७७ ॥
तमालस्य च पत्रं च देवपत्रिकसम्भवम् ।
उन्मत्तश्वेतकृष्णं च पत्रं च कमलस्य च ॥ ७८ ॥
गङ्गापत्रिकपत्रं च पत्रं कह्लारकस्य च ।
जलकह्लारिका पत्रं पत्रं वा हेमरूपकम् ॥ ७९ ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

शतपत्रं सदा प्रोक्तं गन्धारं बुकपत्रकम् ।
पत्रं दुम्बरिकायाश्च ग्रामशिख्याश्च पत्रकम् ॥ ८० ॥
द्रोणापामार्गपत्रं च पत्रं च खदिरस्य च ।
येषां पत्रैः शिवे पूजा तेषां पुष्पैश्च सर्वदा ॥ ८१ ॥
रसाल-किंशुका-शोक-दूर्वायाश्च पुरालकैः (?) ।
शाद्वलैश्च सदा पूजा अभावेन सदा शिवे ॥ ८२ ॥

अथ पुष्पदानप्रकारः । **ज्ञानमालायाम्**—

पत्रं वा यदि वा पुष्पं फलं नेष्टमधो मुखम् ।
दुःखदं तत् समाख्यातं यथोत्पन्नं निवेदयेत् ॥ ८३ ॥

तथा—

अधोमुखार्पणं नेष्टं पुष्पाञ्जलिविधौ न तत् ।
अञ्जलिदानेऽधोमुखता न दोषायेत्यर्थः ।

अथ कालाः । **शिवधर्मे**—

[1]कनकादिकदम्बानि रात्रौ देयानि शंकरे ॥ ८४ ॥
दिवा शेषाणि पुष्पाणि अर्द्धरात्रे[2] च मल्लिका ।
प्रहरं तिष्ठते जाती करवीरमहर्निशम् ॥ ८५ ॥
रात्रौ देयानि—त्रोटनीयानीति सागरः ।
रात्रौ देयानि—पूजनीयानीत्याचारचिन्तामणिकारः ।

अथ काम्ये । **शिवधर्मसंग्रहे**—

नन्दिकेश्वर उवाच—

अकामाभ्यर्चितं लिङ्गमेतदुक्तं फलं मया ।
कामनाभ्यर्च्यमानस्तु शृणु तस्यापि यत् फलम् ॥ ८६ ॥

---

१. कनकानि इति क० ख० पुस्तकयोः ।
२. अर्द्धरात्रौ इति मातृकासु ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

बुकेन वरदो देवः करवीरैर्धनप्रदः ।
अर्केण श्रियमाप्नोति मोक्षं धुस्तूरकेण तु ॥ ८७ ॥
नीलोत्पलैर्भवेद् भोगो योऽर्चयेल्लिङ्गमुत्तमम् ।
रक्ताब्जैः प्राप्नुयाद्राज्यं पुण्डरीकैश्च चक्रिणम् ॥ ८८ ॥
चम्पकैः सर्वकामानि पुन्नागैर्नागकेशरैः ।
ईप्सिताँल्लभते कामान् तथा केशरदामकैः ॥ ८९ ॥
मन्त्रसिद्धिमवाप्नोति योऽर्चयेद् गन्धपुष्पकैः ।
योऽर्चयेत् परमेशानं सितार्केण तथैव च ॥ ९० ॥
सर्वान् कामानवाप्नोति योऽर्चयेद् गन्धपुष्पकैः ।
कुब्जकैर्विपुलो लाभः सौभाग्याय च वारुणी ॥ ९१ ॥
कन्याकामस्तु जातीभिर्योऽर्चयेत् परमेश्वरम् ।
लभते चोत्तमां कन्यां षण्मासेन न संशयः ॥ ९२ ॥
मल्लिका ज्ञानकर्मार्थमर्चयन्तो महेश्वरम् ।
लभते परमं ज्ञानं संसारभयनाशनम् ॥ ९३ ॥
पुत्रकामाय कुन्दैस्तु अर्चयीत शुचिर्नरः ।
लभते बहुपुत्रत्वं धनवन्तं चिरायुषम् ॥ ९४ ॥
आरोग्यं कुशपुष्पैस्तु अशोकैः प्रियसंगमम् ।
कर्णिकारैर्धनं विद्याद् वश्यार्थे द्रोणपुष्पकम् ॥ ९५ ॥
कदम्बेनार्चयेल्लिङ्गं सततं नियतव्रतः ।
शत्रूणां वशकामाय नित्यमेव प्रदापयेत् ॥ ९६ ॥
नश्यन्ति व्याधयस्तस्य योऽर्चयेदतिमुक्तकैः ।
सिन्धुवारस्य पुष्पेण बद्धो मुच्येत बन्धनात् ॥ ९७ ॥
अंकटासितपर्णानि निर्गन्धकुसुमानि च ।
तानि शत्रुविनाशाय देवदेवाय कल्पयेत् ॥ ९८ ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

पीतकानि तु पुष्ट्यर्थे पुष्पाणि विजयाय च ।
नित्यमेव तु यो दद्यात् स तत् काममवाप्नुयात् ॥ ९९ ॥
जलजानि तु पुष्पाणि वश्यार्थे तु प्रकल्पयेत् ।
नीलरक्तानि यान्येव तानि वश्यकराणि तु ॥ १०० ॥
सर्वकामप्रदं विल्वं [1]दारिद्रयस्य विमोचनम् ।
विल्वपत्रात् परं नास्ति येन तुष्यति शङ्करः ॥ १०१ ॥
विजयार्थे दमनकं योजयेन्नियमस्थितः ।
विजिताः शत्रवस्तेन योऽर्चयेद् वृषभध्वजम् ॥ १०२ ॥
सुखं मरुवकेणैव जम्बूटः सर्वकामदः ।
तिलको धनकामाय गोकामाय च वंकुली ॥ १०३ ॥
सौख्यदश्चापि तगरः किङ्किरातश्च कामदः ।
आरोग्यं च धनञ्चैव फलिनी कामदा स्मृता ॥ १०४ ॥
शालः प्रियकरश्चैव किंशुकादायुराप्नुयात् ।
हस्त्यश्वपशुकामाय कुटजेनार्चयेच्छिवम् ॥ १०५ ॥
कर्पूरदमकं दद्याच्छत्रूणां च विनाशने ।
नश्यन्ति शत्रवः शीघ्रं देवदेवस्य पूजनात् ॥ १०६ ॥
श्यामा चारोग्यदा नित्यं जपापुष्पं तथैव च ।
कुरुण्टकस्य वश्यार्थे नित्यं लिङ्गप्रपूजनात् ॥ १०७ ॥
विद्वेषे यूथिका योज्या देवदेवे महेश्वरे ।
केतकी शत्रुनाशाय क्रुद्धो लिङ्गन्तु योऽर्चयेत् ॥ १०८ ॥
सर्वकामप्रदा हृद्या[2] व्याघ्री देवि प्रकीर्तिता ।
ज्योत्स्नाकरी तथैवेह नित्यमेव तु कामदा ॥ १०९ ॥

---

१. दरिद्रस्य इति मातृकासु ।

२. हृष्या इति मातृकासु ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

वासकेनार्चयेद्देवं बलमायुश्च वर्धते ।
झिण्टिका सुखदा नित्यं तथा चाप्सरचम्पकम् ॥ ११० ॥
डिम्भकं व्याधिनाशार्थमश्वकर्णं तथैव च ।
जयन्ती जयकामाय श्वेता च गिरिकर्णिका ॥ १११ ॥
विद्वेषोच्चाटनार्थाय निम्बपुष्पेण चार्चयेत् ।
भण्डी चाकर्षणे योज्या मदन्ती च जया भवेत् ॥ ११२ ॥
ऋषिपुष्पी रुद्रजटी हन्ति सर्वानुपद्रवान् ।
शणपुष्पं च यत् प्रोक्तं कोकिलाक्षं तथैव च ॥ ११३ ॥
सर्वशुक्लं तु शान्त्यर्थे सर्वपीतं तु पौष्टिकम् ।
कृष्णं चैवाभिचारे च देवदेवाय कल्पयेत् ॥ ११४ ॥
पत्रं पुष्पं फलं तोयं तृणं चैव तथा मुने ।
प्रत्यहं शम्भवे दद्यान्नासौ दुर्गतिमाप्नुयात् ॥ ११५ ॥

अथ निषिद्धानि । **शिवधर्मे—**

केतकी चातिमुक्तं च कुन्दं यूथी मदन्तिका ।
शिरीषसर्ज्जबन्धूकं कुसुमानि विवर्जयेत् ॥ ११६ ॥
वाकुचीपत्रकुसुमं करजेन्द्रससुद्भवम् ।
वैभीतिकानि पुष्पाणि पत्राणि च विवर्जयेत् ॥ ११७ ॥

कार्तिकमाहात्म्ये—

जपा-कुन्द-शिरीषैश्च यूथिका मालती तथा ।
केतकीभवपुष्पैश्च नैवार्च्यः शङ्करः सदा ॥ ११८ ॥
सदेति नित्यपूजायामित्यर्थः । काम्ये निषिद्धानामपि विधान-श्रवणात् । कुन्दं तु वर्षव्यापिशिवपूजायां माघमासि विहितमि-

१. जवा इतिमातृकासु ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

त्याचारचिन्तामणिः । **लिङ्गपुराणे—**

सर्ज्ज-बन्धूकपुष्पाणि केन्द्रायूथिमदन्तिका ।
केतकी जातिपुष्पं च श्वेता चैवापराजिता ॥ ११९ ॥
प्रोषिता रक्तश्वेता च तथा भण्डिकपुष्पकैः ।
स्वर्णानुगर्भा चाप्यक्षैर्वैभीतिकुसुमेन च ॥ १२० ॥
पूजयित्वा तथा पुष्पैरेभिश्चैव नरः सदा ।
अवीचि-नरके पापं पचेदेवं न संशयः ॥ १२१ ॥
कपित्थं केतकीपुष्पं मान्दिनी काष्ठपाटला ।
निम्वपुष्पं करञ्जं च धातकीपुष्पमेव च ॥ १२२ ॥
शिरीषगुञ्जलापुष्पमतिमुक्तं च वर्जयेत् ॥ १२२३ ॥
किन्तु परमभक्तानामिह विहिताविहितविचारो नास्ति ।

तदुक्तं **पुष्पाध्याये—**

शुभं वाप्यशुभं वापि फलपुष्पसमन्वितम् ।
भक्त्या निवेदयेत् सर्वं नाशुभं किञ्चिदाप्नुयात् ॥ १२३३ ॥

अन्यत्रापि—

सर्वैः पुष्पैः सदा पूजा विहताविहितैरपि ।
कर्तव्या सर्वदेवानां भक्तियोगोऽत्र कारणम् ॥ १२४३ ॥
यानि कण्टककीर्णानि यानि चोपहतानि च ।
रात्रिपर्युषितानीह दूरतः परिवर्जयेत् ॥ १२५३ ॥

अथोपहतानि । **गौतमीये—**

आसनगतमवनीगतमन्तर्जलधौतमुग्रगन्धञ्च
स्नात्वा यच्च त्रोटितमभिवादनकर्मकर्तृकरलीनम्
सर्वमिदं सर्वेषां देवानामप्रियं कुसुमम् ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

पुष्पमालायाम्—

अन्तर्जलक्षालितमासनस्थं स्वयं विशीर्णं भुवि संविलीनम् ।
एतानि पुष्पाणि समस्तदेवपूजाविधावाहुरकर्मकाणि ॥१२६½॥

हारीतः—

स्नानं कृत्वा तु ये केचित् पुष्पं चिन्वन्ति वै द्विजाः ॥ १२७ ॥
देवतास्तन्न गृह्णन्ति भस्मीभवति काष्ठवत् ।
उग्रगन्धमगन्धं च क्रयक्रीतं च निष्फलम् ॥ १२८ ॥
देवोपरि धृतं म्लानं नार्पयेत्तु कदाचन ।
मलिनं भूमिसंस्पृष्टं कृमिकेशादिदूषितम् ॥ १२९ ॥
पर्युषितानि पुष्पाणि वर्जयेद्देवतार्चने ।
मुकुलेनार्चयेद् देवं तथा छिद्रैस्तु खण्डितैः ॥ १३० ॥
स्वयं विकासितैः पुष्पैः स्वयं च पतितं भुवि ।
वासोभिः संवृतैर्नीतैश्चाङ्गस्पृष्टैस्तथैव च ॥ १३१ ॥
त्रिपत्रान्न्यूनकुसुमैर्नार्चयेत्तु कदाचन ॥ १३१½ ॥

त्रिपत्रेति अनुक्तपुष्पपरम् । स्वयं विकासितैरिति कृत्रिमविकासितैः । अङ्गस्पृष्टैरिति पादादिस्पृष्टैरित्यर्थः ।
अथ पुष्पविशेषाणां भूगतादिदोषाभावमाह—

गौतमीये—

भूगतं वर्ज्जयेत् पुष्पं शेफालिबकुलं विना ॥ १३२ ॥
कलिकाभिस्तथा त्याज्या विना चम्पकपद्मकैः ।
बिल्वस्य खदिरस्यैव तथा धात्रीदलस्य च ॥ १३३ ॥
तमालस्य च पत्रस्य छिन्न-भिन्नं न दुष्यति ।
तुलस्यगस्त्यबिल्वानां नास्ति पर्युषितात्मता ॥ १३४ ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

वर्ज्यं पर्युषितं पुष्पं वर्ज्यं पर्युषितं जलम् ।
अवर्ज्यं जाह्नवीतोयमवर्ज्यं तुलसीदलम् ॥ १३५ ॥
तुलसी सर्वदा शुद्धा तथा बिल्वदलानि च ॥ १३५½ ॥
सर्वदेति पञ्चदिनपर्यन्तमित्यर्थः । पञ्चदिनानन्तरं पर्युषित—

श्रवणात् । तथा—

जलजानां च पुष्पाणां बिल्वपत्रस्य चैव हि ।
एषां पर्युषिता शङ्का कार्या पञ्चदिनोर्द्ध्वतः ॥ १३६½ ॥
बुकपुष्पे तु सप्तरात्रानन्तरं निर्माल्यत्वापत्तिः ।

शिवधर्मसंग्रहे—

सप्तरात्रं निवेद्यस्तु बुको रुद्राय धीमता ॥ १३७ ॥
दिने दिने तु दातव्यं शोचयित्वा पुनः पुनः ।
सप्तरात्रमतिक्रम्य निर्माल्यत्वं प्रपद्यते ॥ १३८ ॥

हारीतः—

तिष्ठेद्दिनत्रयं शुष्कं पद्ममामलकं तथा ।
दिनैकं करवीराणि योग्यानि च तपोधने ॥ १३९ ॥
पर्युषितेष्वपि मालाकारगृहस्थितेषु न दोषः इति **शिवागमः** ।

इति श्रीपुष्पचिन्तामणौ प्रथमः प्रकाशः ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

अथ द्वितीयः प्रकाशः

अथ विष्णोः । **नरसिंहपुराणे—**

तपःशीलगुणोपेतपात्रे वेदस्य पारगे ।
दत्त्वा दशसुवर्णानि यत्फलं लभते नरः ॥ १ ॥
तत् फलं लभते मर्त्यो हरेः कुसुमदा नरः ।
मल्लिका-मालती-जाती-केतकी-लोध्र-चम्पकैः ॥ २ ॥
पुन्नाग-नाग-वकुलैः पद्मैरुत्पलजातिभिः ।
एतैरन्यैश्च कुसुमैः प्रशस्तैरच्युतं नरः ॥ ३ ॥
अर्चयेद् दशस्वर्णस्य प्रत्येकं फलमाप्नुयात् ।
एकेन करवीरेण सितेनाप्यसितेन वा ॥ ४ ॥
हरिं वा हरमभ्यर्च्य न पुनस्तनयो भवेत् ।

विष्णुपुराणे—

मालती मल्लिका चैव यूथिका चातिमुक्तकः ॥ ५ ॥
पाटला करवीरं च जया पावन्तिरेव च ।
कुब्जकस्तगरश्चैव कर्णिकारः कुरुण्टकः ॥ ६ ॥
चम्पको वातकः कुन्दो वाणो वर्वरमल्लिका ।
अशोकस्तिलकश्चम्पस्तथा चैवाटरूपकः ॥ ७ ॥
शमीपुष्पप्रकारास्तु शुभाः केशवपूजने ।
तानि पुष्पाणि देयानि विष्णवे प्रभविष्णवे ॥ ८ ॥

अथ पुष्पविशेषाणां फलानि । **नरसिंहपुराणे—**

द्रोणपुष्पे तथैकस्मिन् माधवाय निवेदिते ।
दत्त्वा दशसुवर्णानां यत्फलं तदवाप्नुयात् ॥ ९ ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

एवं पुष्पविशेषेण फलं तदधिकं नृप ।
ज्ञेयं पुष्पान्तरस्यापि यथा स्यात्तन्निबोध मे ॥ १० ॥
द्रोणपुष्पसहस्रेभ्यः खादिरं तु विशिष्यते ।
खदिपुष्पसहस्रेभ्यः शमीपुष्पं विशिष्यते ॥ ११ ॥
शमीपुष्पसहस्रेभ्यो विल्वपत्रं विशिष्यते ।
विल्वपत्रसहस्रेभ्यो वकपुष्पं विशिष्यते ॥ १२ ॥
वकपुष्पसहस्राद्धि नन्द्यावर्तं विशिष्यते ।
नन्द्यावर्तसहस्राद्धि करवीरं विशिष्यते ॥ १३ ॥
करवीरसहस्राद्धि चम्पकं तु विशिष्यते ।
चम्पकस्य पुष्पशतादशोकं पुष्पमुत्तमम् ॥ १४ ॥
अशोकपुष्पसहस्राद्धि सेवन्तीपुष्पमुत्तमम् ।
सेवन्तीपुष्पसहस्राद्धि कुब्जकं पुष्पमुत्तमम् ॥ १५ ॥
कुब्जकस्य सहस्राद्धि मालतीपुष्पमुत्तमम् ।
मालतीपुष्पसहस्राद्धि त्रिसन्ध्यापुष्पमुत्तमम् ॥ १६ ॥
त्रिसन्ध्यारक्तसहस्राद्धि त्रिसन्ध्याश्वेतमुत्तमम् ।
त्रिसन्ध्याश्वेतसहस्राद्धि कुन्दपुष्पं विशिष्यते ॥ १७ ॥
कुन्दपुष्पसहस्राद्धि शतपत्रं विशिष्यते ।
शतपत्रसहस्राद्धि मल्लिकापुष्पमुत्तमम् ॥ १८ ॥
मल्लिकापुष्पसहस्राद्धि जातीपुष्पं विशिष्यते ।
सर्वासां पुष्पजातीनां जातीपुष्पमिहोत्तमम् ॥ १९ ॥
जातीपुष्पसहस्रेण यच्छेन्मालां सुशोभनाम् ।
विष्णवे विधिवद् भक्त्या तस्य पुण्यफलं शृणु ॥ २० ॥
कल्पकोटिसहस्राणि कल्पकोटिशतानि च ।
वसेद् विष्णुपुरे धीमान् विष्णुतुल्यपराक्रमः ॥ २१ ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

शेषाणां पुष्पजातीनां यत् फलं विधिदेशितम् ।
तत्फलस्यानुसारेण विष्णुलोके महीयते ॥ २२ ॥

विधिवदिति पूर्वोक्तलक्षणयुक्ता मालेत्यर्थः ।

पत्राण्यपि च पुण्यानि हरिप्रीतिकराणि च ।
प्रवक्ष्यामि नृपश्रेष्ठ शृणुष्व गदतो मम ॥ २३ ॥
अपामार्गपत्रं पुण्यं तस्माद् भृङ्गरजस्य च ।
तस्माच्च खादिरं श्रेष्ठं तस्माच्च शमीपत्रकम् ॥ २४ ॥
दूर्वापत्रं ततः श्रेष्ठं ततोऽपि कुशपत्रकम् ।
तस्माद् दमनकं श्रेष्ठं ततो बिल्वस्य पत्रकम् ॥ २५ ॥
बिल्वपत्रादपि हरेस्तुलसीपत्रमुत्तमम् ।
एतेषां तु यथालब्धैः पत्रैश्चैवार्चयेद्धरिम् ॥ २६ ॥
सर्वपापविनिर्मुक्तो विष्णुलोके महीयते ॥ २६½ ॥

गौतमीये—

कमले करवीरे द्वे तुलस्यौ जातिकेतके ॥ २७ ॥
नागकेशर-पावन्ती-कह्लारं चम्पकोत्पले ।
नन्द्यावर्तं च यूथी च मल्लिका नवमल्लिका ॥ २८ ॥
कुन्दमन्दारकं चैव सौगन्धिकं च केशरम् ।
करञ्जाशोकसर्ज्जानि बिल्वं च मुनिपुष्पकम् ॥ २९ ॥
पत्रमामलकं चैव कर्णिकारं पलाशकम् ।
एतान्यन्यानि पुष्पाणि यथालाभं निवेदयेत् ॥ ३० ॥
सुरभीणि च सर्वाणि स्थलजान्यम्बुजानि च ।
एतानि[1] पुष्पाणि देयानि विष्णवे प्रभविष्णवे ॥ ३१ ॥

---

१ पुष्पाण्येतानि देयानि इति युक्तः पाठः ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

वामनपुराणेबलिं प्रति प्रह्लाद-वाक्यम्—

तान्येव च प्रशस्तानि कुसुमानि महासुर ।
तानि स्युर्वर्णयुक्तानि रसगन्धयुतानि च ॥ ३२ ॥
जातीशताह्वा सुमनः कुन्दं चारुपुटस्तथा ।
बाणं च चम्पकाशोकं करवीरं च यूथिका ॥ ३३ ॥
पारिभद्रं पाटला च वकुलं गिरिशालिनी ।
कनकं जम्बुवनजं पीतकं तगरन्त्वपि ॥ ३४ ॥
एतानि हि प्रशस्तानि कुसुमान्यच्युतार्चने ॥ ३४½ ॥

स्कन्दोक्तवैष्णवामृते—

मालती तुलसी पद्मं केतकी मुनिपुष्पकम् ॥ ३५ ॥
येऽर्चयन्ति जगन्नाथं ते गच्छन्ति हरेः पदम् ।
त्रिंशद्वर्षसहस्राणि त्रिंशद्वर्षशतानि च ॥ ३६ ॥
प्रीतो भवति दैत्यारिः कदम्बकुसुमार्चितः ।
यथा पद्मालयं प्राप्य प्रीतो भवति माधवः ॥ ३७ ॥
कदम्बकुसुमं दृष्टा तथा प्रीणाति केशवः ।
सकृत् कदम्बपुष्पेण हेलया हरिरर्चितः ॥ ३८ ॥
सप्तजन्मानि देवर्षे तस्य लक्ष्मी न दूरगा ।
कदम्बपुष्पनिकरं यः करोति शिरोपरि ॥ ३९ ॥
केशवस्य महाप्राज्ञो गोसहस्रफलं लभेत् ॥ ३९½ ॥

तथा—

मालतीमालया विष्णुः पूजितो येन कार्तिके ।
कपिलाशतदानस्य लभते फलमुत्तमम् ॥ ४०½ ॥
मल्लिकाकुसुमैर्देवं वसन्ते गरुडध्वजम् ।
योऽर्चयेत् परया भक्त्या दहेत् पापं त्रिधार्जितम् ॥ ४१½ ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

दमनेनापि देवेशं सम्प्राप्य मधुमाधवम् ।
कपिलाशतदानस्य अर्चनाल्लभते फलम् ॥ ४२ ॥

केतकीपत्रेणैकेन[1] पूजितो गरुडध्वजः ।
समाः सहस्रं सुप्रीतो भवते मधुसूदनः ॥ ४३ ॥

मुनिपुष्पकृतां मालां येऽर्चयन्ति जनार्दनम् ।
देवेन्द्रोऽपि मुनिश्रेष्ठ करोति करसम्पुटम् ॥ ४४ ॥

यः पुनः पाटलापुष्पैर्वसन्ते गरुडध्वजम् ।
अर्चयेत् परया भक्त्या मुक्तियोगी भवेद्दिसः ॥ ४५ ॥

बहुलाशोककुसुमैर्येऽर्चयन्ति जगत्पतिम् ।
विशोकास्ते भविष्यन्ति यावच्चन्द्रदिवाकरौ ॥ ४६ ॥

येऽर्चयन्ति जलाध्यक्षं करवीरैः सितासितैः ।
चतुर्युगाणि[2] विप्रेन्द्र प्रीतो भवति माधवः ॥ ४७ ॥

मञ्जर्या सहकारस्य केशवोपरि सर्वदा ।
येऽर्चयन्ति महाभागा गोकोटिफलभागिनः ॥ ४८ ॥

दूर्वाङ्कुरं[3] हरेर्यस्तु पूजाकाले प्रयच्छति ।
पूजाफलं शतगुणं सम्यगाप्नोति मानवः ॥ ४९ ॥

शमीपत्रैस्तु यो देवं पूजयत्यसुरद्विषम् ।
यममार्गं महाघोरं निस्तीर्णं तेन नारद ॥ ५० ॥

वर्षाकाले तु देवेशं कुसुमैश्चम्पकोद्भवैः ।
येऽर्चयन्ति न ते मर्त्याः संसारे न पुनर्भवाः ॥ ५१ ॥

---

१. केतकीपत्रनैकेन इति मातृकासु ।
२. चतुर्युगानि इति मातृकासु ।
३. दूर्वाङ्कुरैरिति मातृकासु ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

[१]कुम्भीपुष्पेण देवर्षे येऽर्चयन्ति जनार्दनम् ।
सुवर्णपर-मानस्य[२] लभते तत्फलं मुने ॥ ५२½ ॥

सुवर्णकेतकीपुष्पं यच्छन्ति च जनार्दने ।
कोटिजन्मार्जितं पापं दहते गरुडध्वजः ॥ ५३½ ॥

कुङ्कुमारुणपद्माभ्यां गन्धाभ्यां शतपत्रिकाम् ।
यो ददाति जगन्नाथे श्वेतद्वीपे वसेच्चिरम् ॥ ५४½ ॥

यत् फलं सर्वपुष्पेषु पुष्पपत्रेषु नारद ।
तुलसीदलमात्रेण प्राप्यते केशवार्चनात् ॥ ५५½ ॥

दृष्टा स्पृष्टा तथा ध्याता कीर्तिता नमिता स्तुता ।
रोपिता सिञ्चिता नित्यं पूजिता तुलसी शुभा ॥ ५६½ ॥

रोपिता तुलसी यावत् कुरुते मूलविस्तरम् ।
तावद् युगसहस्राणि तनोति सुकृतं मुने ॥ ५७½ ॥
रोपिता तुलसी पुंभिर्वर्धते वसुधातले ॥ ५८ ॥

कुलं तेषां तु ये जाता ये भविष्यन्ति ये गताः ।
कुल्यायुतशतं साग्रं ते वसन्ति हरेर्गृहम् ॥ ५९ ॥

अथ निषिद्धानि । **गौतमीये—**

न रक्तचन्दनं जातु गृह्णीयाद्रक्तपुष्पकम् ।
विल्वपत्रैस्तत्प्रसूनैर्नार्चयेद् देवकीसुतम् ॥ ६० ॥
शुष्कैस्तु नार्चयेद्विष्णुं पुष्पैः पत्रैः फलैरपि ।
स्नात्वानीतैः पर्युषितैर्याचितैः कृष्णवर्णकैः[३] ॥ ६१ ॥

---

१. कुम्भिपुष्पेण इति मूले पाठः ।
२. परमात्रस्येति कपुस्तके, पलमात्रस्येति मूले ।
३. कृष्णपुष्पकैरिति मूले ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

रक्तपुष्पकैरित्यनुक्तरक्तपुष्पपरम् । अन्यथा रक्तकरवीर-निषेधापत्तेः। विल्वपत्रैरिति गोपालमूर्तिपरम् देवकीसुतमिति विशेषण-श्रवणात् । विष्णुपूजायां **नरसिंहपुराणे** विल्वपत्राभिधानाच्च ।

वामनपुराणे—

सुरभीणि तथान्यानि वर्जयित्वा तु केतकीम् ॥ ६१½ ॥

इति केतकीनिषेधात् नरसिंहं विहायेति **रत्नाकरः** ।

निषिद्धविहितमित्याचारचिन्तामणिकारः ।

वस्तुतस्तु केतकीनिषेधो नरसिंहस्यैव । तथा चोक्तं—

पुष्पमालायाम्—

मन्दारमर्कधुस्तूरं शाल्मलीकाञ्चनारजम् ॥ ६२ ॥
निषिद्धं विष्णुपूजायां पुष्पं वैभीतकं तथा ।
नरसिंहस्यपूजायां निषिद्धं केतकीद्वयम् ॥ ६३ ॥

कार्तिकमाहात्म्ये—

शिरीषान्मत्तगिरिजान्मल्लिकाशाल्मलीभवैः ।
अर्कजैः कर्णिकारैश्च विष्णुर्नार्च्यस्तथाक्ततैः ॥ ६४ ॥

अथ सूर्यस्य। **भविष्यपुराणे—**

दश दत्त्वा सुवर्णानां निष्कानां लभते फलम् ।
करवीरे नृपैकस्मिन्नर्काय विनिवेदयेत् ॥ ६५ ॥
लभते तत्फलं वीर यथाह भगवान् रविः ।
भक्त्या पूजयते योऽर्कमर्कपुष्पैः समाहितः ॥ ६६ ॥
तेजसा सोऽर्कसंकासोह्यर्केण सह मोदते ।
जपापुष्पसहस्रेभ्यः पद्ममेकं विशिष्यते ॥ ६७ ॥
वीर, पद्मसहस्रेभ्यो बुकपुष्पं विशिष्यते ।
बुकपुष्पसहस्रेभ्यः कुशपुष्पं विशिष्यते ॥ ६८ ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

कुशपुष्पसहस्रेभ्यः शमीपुष्पं विशिष्यते ।
शमीपुष्पसहस्रेभ्यः प्रशस्तं नीलमुत्पलम् ॥ ६९ ॥
नीलोत्पलसहस्रेण नीलोत्पलशतेन च ।
रक्तैश्च करवीरैश्च यस्तु पूजयते रविम् ॥ ७० ॥
कल्पकोटिसहस्राणि कल्पकोटिशतानि च ।
वसेदर्कपुरे श्रीमानर्कतुल्यपराक्रमः ॥ ७१ ॥
केशकीटविपन्नानि त्यजेदुपहतानि च ।
मुकुलैर्नार्चयेद् भानुमपक्वं न निवेदयेत् ॥ ७२ ॥
अलाभे पुष्पजातीनां पत्राण्यपि निवेदयेत् ।
पत्राणामप्यलाभे तु भक्त्या भवति पूजितम्[1] ॥ ७३ ॥

तथा—

मल्लिका मालती चैव दूर्वाशोकातिमुक्तकः ।
पाटला करवीरं च जया पावन्ति रेव च ॥ ७४ ॥
कुब्जकस्तगरं चैव कर्णिकारः कुरुण्टकः ।
चम्पको वालकः कुन्दो बाणो वर्वरमल्लिका ॥ ७५ ॥
अशोकस्तिलको लोध्रस्तथा चैवाटरूषकः ।
शतपत्राणि चान्यानि वकुलश्च विशेषतः ॥ ७६ ॥
अगस्त्यं किंशुकं तद्वत् पूजायां भास्करस्य च ।
विल्वपत्रं शमीपत्रं पत्रं भृङ्गरजस्य च ॥ ७७ ॥
तमालपत्रं च हरेः सदैव तपनप्रियः ।
तुलसी कालतुलसी तथा रक्तं च चन्दनम् ॥ ७८ ॥
केतकीपत्रपुष्पं च सद्यस्तुतिकरं रवेः ।
येषां न च[2] निषेधोऽस्ति गन्धवर्णान्वितानि च ॥ ७९ ॥

---

१. पूजनमित्यर्थः ।
२. नात्र इति मूले ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

तानि पुष्पाणि देयानि भानवे लोकभानवे ॥ ७९½ ॥

पुष्पमालायाम्—

जाती-कुन्द-शमी-कुशेशय-कुशाशोकं बुकं किंशुकं
पुन्नागं करवीर-चम्पक-जपा-शेफालिका-कुब्जकम् ।
वासन्ती शतपत्रिका विचकिलं मन्दारमर्काह्वयं
पीता[1]म्लातकनागकेशर वकं पुष्पं रवेः शस्यते ॥ ८०½ ॥
लोध्रं कैरवमुत्पलं च सकलं सिंहास्यकं पाटला
यूथी कुङ्कुमकर्णिकारतिलकं बाणं कदम्बं जया ।
काशं केशरकेतकी मरुवकं द्रोणं त्रिसन्ध्याह्वयं
पुष्पं शस्तमिदं च पूजनविधौ सर्वं सहस्राचिषः ॥ ८१½ ॥

अथ कालविशेषः । **भविष्ये—**

मुकुलानि कदम्बानि रात्रौ देयानि भानवे ।
दिवाशेषाणि पुष्पाणि दिवारात्रौ च मल्लिका ॥ ८२½ ॥

अथ निषिद्धानि । तत्रैव—

कृष्णलोन्मत्तकं काञ्ची तथा न गिरिकर्णिका ॥ ८३ ॥
न कण्टकारिका पुष्पं तथान्यं गन्धवर्जितम् ।
न चाम्लातकजैः पुष्पैरर्चनीयो दिवाकरः ॥ ८४ ॥

यामले—

नाक्षतैरर्चयेद् विष्णुं न तुलस्या विनायकम् ।
न दूर्वया यजेद् दुर्गां विल्वपत्रैर्दिवाकरम् ॥ ८५ ॥

शातातपीये—

शिवे विवर्जयेत् कुन्दमुन्मत्तं च तथा हरेः ।
न दूर्वया यजेद् दुर्गां सूर्यस्य तगरं तथा ॥ ८६ ॥

---

१. शीताम्लातक इति मूले । पीताम्लातक इति पुष्पमालायाम् । क ख पुस्तकयोश्च ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

॥ तगरनिषेधो वन(नग)तगरीयविषये इत्याचार-चिन्तामणिकारः। निषिद्धविहितमिति केचित्। निषिद्ध विहितं सूर्ये तगरं कण्ठकारिकेति वचनात्।

अथ ग्रहाणाम्। **भविष्ये—**

हयारिकुसुमैः सूर्यं कुमुदैश्चन्द्रमर्चयेत्।
क्षितिजं तु जपापुष्पैश्चम्पकेन तु सोमजम् ॥ ८७ ॥
शतपत्रैर्गुरुः पूज्यो जातीपुष्पैस्तु भार्गवः।
मल्लिकाकुसुमैः पङ्गुः[1] कुन्दपुष्पैर्विधुन्तुदः ॥ ८८ ॥
केतवो विविधैः पुष्पैः शान्तिकालेषु सर्वदा ॥ ८८½ ॥

अथ श्राद्धस्य। **विष्णुपुराणे—**

तुलसी शतपत्रं च भृङ्गराजं च चम्पकम्।
तगरं मारुतं चैव पितॄणां मोक्षदायकम् ॥ ८९½ ॥

पुष्पमालायाम्—

माधवी-तगर-कुन्द-कुब्जकं यूथिका-जलज-चम्पकोत्पलम्।
कैरवं च शतपत्रिका तथा श्राद्धकर्मणि शुभं तुलस्यति ॥९०½॥

अथ निषिद्धानि। **तत्रैव—**

उक्तेतरं लोहितमप्रशस्तं मन्दारमर्कोद्भवभान्तिके च।
शुक्लेतरं गन्धविहीनमुग्रगन्धं च पुष्पं न हितं पितृभ्यः ॥९१½॥

इति श्री पुष्पचिन्तामणौ द्वितीयप्रकाशः।

---

१. पङ्गुः—शनैश्चरः।

CC-0. In Public Domain. Digitization by eGangotri
Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

अथ तृतीयः प्रकाशः

अथ दुर्गायाः । देवीपुराणे—

पुष्पैररण्यसंभूतैः पत्रैर्वा गिरिसंभवैः ।
अपर्युषितनिश्छिद्रैः प्रोक्षितैर्जन्तुवर्जितैः ॥ १ ॥
आत्मारामोद्भवैर्वापि भक्त्या संपूजयेच्छिवाम् ।
ऋतुकालोद्भवैः पुष्पैर्मल्लिकाजातिकुब्जकैः ॥ २ ॥
सितरक्तैश्च नीलैश्च तथा पद्मैश्च पाण्डुरैः ।
किंशुकैस्तगरैश्चैव अकुरुण्टकचम्पकैः ॥ ३ ॥
वकुलैश्चैव मन्दारैः कुन्दपुष्पैः टिरीटकैः ।
करवीरार्कपुष्पैश्च शैंशिपैश्चापराजितैः ॥ ४ ॥
सितरक्तैस्तथा पीतैः कृष्णैश्चैव चतुर्विधैः ।
धुस्तूरकातिमुक्तैश्च बन्धूकागस्त्यसंभवैः ॥ ५ ॥
दमनैः सिन्धुवारैश्च सुरभीमरुवकैस्तथा ।
लताभिर्ब्रह्मवृक्षस्य दूर्वाङ्कुरैश्च कोमलैः ॥ ६ ॥
मञ्जरीभिः कुशानां च बिल्वपत्रैः सुशोभनैः ।
धान्यानां सर्वपत्रैश्च पुष्पैश्चैव प्रजपूयेत् ॥ ७ ॥
अलाभेन तु पुष्पाणां पत्राण्यपि निवेदयेत् ।
पत्राणामप्यलाभे तु फलान्यपि निवेदयेत् ॥ ८ ॥
फलानामप्यलाभे तु तृणगुल्मौषधैरपि ।
ओषधीनामलाभे तु भक्त्या भवति पूजनम् ॥ ९ ॥

भविष्यपुराणे—

सुरभीणि च सर्वाणि स्थलजान्यम्बुजानि च ।
गृह्णामि शिरसा नित्यं यो मे भक्त्या प्रयच्छति ॥ १० ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

अथ पुष्पविशेषाणां फलानि ।

मल्लिकामुत्पलं पद्मं शमीपुन्नागचम्पकम् ।
अशोकं कर्णिकारं च द्रोणपुष्पं विशेषतः ॥ ११ ॥
करवीरं जपापुष्पं कुङ्कुमं नागकेशरम् ।
यः प्रयच्छति पुण्यार्थं पुष्पाण्यन्यानि भारत ॥ १२ ॥
चण्डिकायै नरश्रेष्ठ श्रद्धाभक्तिसमन्वितः ।
स कामानखिलान् प्राप्य दुर्गायानुचरो भवेत् ॥ १३ ॥

तथा—

पुन्नागश्चम्पकः कुन्दो यूथिका नवमल्लिका ।
तगरार्जुनमल्ली च बृहती शतपत्रिका ॥ १४ ॥
तथा कुमुद-कह्लार-विल्व-पाटल-मालती- ।
जपा-विचकिलाशोक-रक्त-नीलोत्पलानि च ॥ १५ ॥
दमनो मरुपत्रं च शतपुण्य-विवर्धये ॥ १५३ ॥

तथा—

सुगन्धि गन्धपुष्पैस्तु पूजयेद्यस्तु चण्डिकाम् ।
मुक्तिभिर्मालिया वापि सोऽश्वमेधफलं लभेत् ॥ १६३ ॥

माललक्षणमाह—महाकालसंहितायाम्—

एकजातीयकैः पुष्पैर्भिन्नजातीयकैरपि ॥ १७ ॥
माला तथैकवर्णास्याद् भिन्नवर्णापि वा प्रिये ।
सा पुनस्त्रिविधा ज्ञेया परिणाहवशेन तु ॥ १८ ॥
पतेद्धृदयपर्यन्तं या माला मोदशालिनी ।
रैक्षिका सा परिज्ञेया सर्वावरतया स्थिता ॥ १९ ॥
अधोवलम्बिनी नाभेः कौसुमीया स्रगुच्यते ।
साधारणी परिज्ञेया मध्यमा पूर्वतोऽधिका ॥ २० ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

आगुल्फस्रंसिनी या तु पादपद्मोपरि स्थिता ।
वनमालेति विख्याता सर्वाभ्यः स्रग्भ्य उत्तमा ॥ २१ ॥
कश्चिद्विशेषोऽत्रापि तमपि व्याहरामि ते ।
करवीरैर्जपापुष्पैर्वकैर्दमनकैरपि ॥ २२ ॥
नीलोत्पलैः सरसिजैर्लवङ्गैर्नागकेशरैः ।
जातीभिर्मालतीभिश्च मल्लिकाचम्पकादिभिः ॥ २३ ॥
रचिता या भवेयुर्हि स्रजः परमशोभनाः ।
मालाभ्योऽन्याभ्य एतास्तु देव्याः प्रीतिप्रदायिकाः ॥ २४ ॥
अतोऽन्येषु प्रसूनेषु तिष्ठन्तु वरवर्णिनि ।
अमीभिः कुसुमैस्तासां ग्रथने यत्नमाचरेत् ॥ २५ ॥

अथ पुष्पविशेषमालाफलानि । भविष्यपुराणे—

वकपुष्पस्रजोभिस्तु पूजयेद् यस्तु चण्डिकाम् ।
वाजपेयस्य यज्ञस्य फलं विन्दति मानवः ॥ २६ ॥

द्रोणपुष्पस्य तत्रैव—

द्रोणपुष्पस्रजोभिस्तु पूजयेद् यस्तु चण्डिकाम् ।
राजसूयफलं प्राप्य शक्रलोके महीयते ॥ २७ ॥

शमीपुष्पस्य—

शमीपुष्पस्रजोभिस्तु आर्यां[1] सम्पूज्य श्रद्धया ।
गोसहस्रफलं प्राप्य विष्णुलोके महीयते ॥ २८ ॥

कुशपुष्पस्य—

पूजयित्वा तु राजेन्द्र श्रद्धया विधिवन्नृप ।
कुशपुष्पस्रजोभिस्तु पितृलोके महीयते ॥ २९ ॥

---

१. आर्याम्-दुर्गाम् ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

विल्वपत्रमालाद्वयस्य—

मालाद्वयेन संपूज्य दुर्गादेवीं नराधिप ।
विल्वपत्रस्य पत्राणां राजसूयफलं लभेत् ॥ ३० ॥

तथा—

नीलोत्पलस्रजोभिस्तु पूजयेद् यस्तु चण्डिकाम् ।
वाजपेयफलं प्राप्य रुद्रलोके महीयते ॥ ३१ ॥

तथा—

नीलोत्पलसहस्रेण यो मालां संप्रयच्छति ।
चण्डिकायैनरश्रेष्ठ तस्य पुण्यफलं शृणु ॥ ३२ ॥
वर्षकोटिसहस्राणि वर्षकोटिशतानि च ।
दुर्गायानुचरो भूत्वा रुद्रलोके स मोदते ॥ ३३ ॥

कालिकापुराणे—

विल्वपत्रैरखण्डैर्यः सकृद् देवीं प्रपूजयेत् ।
स गोलक्षफलं प्राप्य दुर्गायानुचरो भवेत् ॥ ३४ ॥

अन्यत्रापि—

सर्वतो विल्वपत्रस्य देव्याः प्रीतिकरं परम् ॥ ३४½ ॥

अथ प्रतिमासि पुष्पार्चनविधानम् । देवीपुराणे—

वैशाखे मासि कर्तव्या पूजा पाटलया सदा ॥ ३५ ॥
सर्वान् कामानवाप्नोति ज्येष्ठे पद्मार्चनैः सदा ।
आषाढे विल्वकह्लारविहितं लभते फलम् ॥ ३६ ॥
वनमालिकया पूजा नभोमासि महाफला ।
कदम्बैश्चम्पकैरेवं नभस्ये सर्वकामदा ॥ ३७ ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

पूजा पङ्कजमालत्या ईषेऽभ्युदय-दायिनी ।
शतपत्रिकया पूजा कार्तिके सार्वकामिकी ॥ ३८ ॥

मार्गे नीलोत्पलैः पूजा पौषे तु कुब्जकैः सदा ।
माघे तु कुन्दकुसुमैर्मरुबकेन तु फाल्गुने ॥ ३९ ॥
शतपत्रैस्तथा चैत्रे यः कुर्यात् सुरसत्तम ।
लभते सर्वविज्ञानं सर्वदानफलं लभेत् ॥ ४० ॥

अथकालः । **भविष्यपुराणे—**

कदम्बैरर्चयेद्रात्रौ मल्लिकामुभयोस्तथा ।
दिवा शेषाणि पुष्पाणि यथालाभं प्रपूजयेत् ॥ ४१ ॥

अथ निषिद्धानि । **मत्स्यसूक्ते—**

महालक्ष्म्यास्तु तुलसी झिण्टिका काञ्चनं तथा ।
न दूर्वया यजेद् दुर्गां कमलैः कमलां नहि ॥ ४२ ॥

शातातपीये—

शिवे विवर्जयेत् कुन्द मुन्मत्तं च तथा हरेः ।
देवीनां चार्कमन्दारौ सूर्यस्य तगरं तथा ॥ ४३ ॥

मन्दारार्कौ इति निषेधो दुर्गेतरदेवीपरमित्याचारचिन्तामणौ । अत्र दुर्गेतरदेव्यः सतीसावित्र्यादयः । बकुलैश्चैव मन्दारैरिति वक्ष्यमाणासितापूजनप्रकरणेऽपि ।

'चन्दनं चार्ककुसुमं दद्यात् श्वेतापराजिता' इति **नीलतन्त्रे**। नक्षत्रविद्यायामर्चनदर्शनाच्च ।

बकुलैश्चैव मन्दारैरिति **महाकालसंहितायाम्** । असितापूजायां दर्शनाच्च ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

देवीपुराणे—

मुकुलैर्नार्चयेद् देवीमपक्वं न निवेदयेत् ।
फलं च कृमिविद्धं च कालापक्वमपि त्यजेत् ॥ ४४ ॥
फलं कथितविद्धं च यत्नात् पक्वमपि त्यजेत् ।
कीटकेशादिविद्धानि शीर्णपर्युषितानि च ॥ ४५ ॥
स्वयं पतितपुष्पाणि त्यजेदुपहतानि च ॥ ४५ १/२ ॥

कालापक्वं भिन्नकालपक्वम्, अकालजातफलमित्यर्थः ।

पुष्पाध्याये—

सर्वैः पुष्पैः सदा पूजा विहिताविहितैरपि ।
कर्तव्या सर्वदेवानां भक्तियोगोऽत्र कारणम् ॥ ४६ १/२ ॥

किञ्च

देवीपूजा सदा कार्या जलजैः स्थलजैरपि ।
निषिद्धैर्विहितैर्वापि भक्तियोगोऽत्र कारणम् ॥ ४७ १/२ ॥

इति राघवभट्टः ।

इति श्रीपुष्पचिन्तामणौ तृतीयः प्रकाशः ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

अथ चतुर्थः प्रकाशः

अथ भगवत्याः सिंहासनविद्यायाः तन्त्रोक्तपुष्पविधानं लिख्यते। तत्रादौ पश्चिमाम्नाये। तथाचोक्तम्—मन्थानभैरवे मेदिनीकूर्मप्रस्तारे—

श्रीभैरव उवाच—

अथातः सम्प्रवक्ष्यामि द्रव्याणां निर्णयं स्फुटम्।
पुष्पाणां च सुरेशानि क्रमसम्भार-लक्षणम्॥ १॥
जाती च पाटली यूथी चम्पकैः श्वेत उत्पलैः।
केतकी हेमजाली च मुद्गरैः शतपत्रकैः॥ २॥
नीलोत्पलैस्तथा वाणी[1] करवीरैः कदम्बकैः।
बन्धूकपद्म कुन्दाख्यैः शालिपुष्पैश्च पाटलैः॥ ३॥
कुसुम्भैः किंशुकैः पुष्पैः पुन्नागैर्नागकेसरैः।
वकुलैस्तगरैश्चान्यैर्वचकुन्दाख्यसम्भवैः॥ ४॥
काशसर्ज्जोद्भवैर्देवि त्रिसन्ध्यैः कर्णिकारकैः।
रक्तोत्पलैर्महापुष्पैस्तथान्यैश्चारुगन्धिभिः[2]॥ ५॥
भुक्तिमुक्तिप्रदा जाती चम्पकैस्तम्भने हितम्।
उच्चाटे केतकी यूथी श्वेतमुत्पलमायुदम्॥ ६॥
लाभार्थे हेमजाती च [3]बाणी बलविवर्द्धनी।
श्वेतपाटलिका देवि[4] ददाति च महद् यशः॥ ७॥

---

१. वाली इति मूले ख पुस्तके च।
२. ये चान्ये चारुगन्धवान् इति मातृकासु।
३. वाली इति मूले, कपुस्तके च पाठः।
४. चैव इति मूले।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

शान्तिपुष्टिकरं पद्मं शतपत्रं सुपुत्रदम् ।
बन्धूकं वश्यदं प्रोक्तं तथा रक्ताश्वमारकम् ॥ ८ ॥
सौभाग्यं शालिपुष्पैश्च मुद्गरं सुखदायकम् ।
कदम्बं वकुलं कुन्दं वचकुन्दोऽघनाशनः ॥ ९ ॥
कुसुम्भकिंशुके देवि वश्यताकृष्टिकारके[1] ।
महालक्ष्मीप्रदे पुष्पे पुन्नागनागकेसरे[2] ॥ १० ॥
रक्तमुत्पलकं वश्ये नीलकृष्णं च मारणे ।
त्रिसन्ध्यासम्भवैः पुष्पैः शत्रूणां च भयावहम् ॥ ११ ॥
दमनं तुलसी भद्रे सर्वपापक्षयं करम् ।
सिन्दूरी वश्यकृत् प्रोक्ता सदाकर्षणमारका ॥ १२ ॥
त्रिसन्ध्यासम्भवैः पुष्पैः क्रमं योऽभ्यर्चयेत् सदा ।
तस्य विघ्नो न जायेत सत्यमेतन्न संशयः ॥ १३ ॥

अथ निषिद्धानि । तथा—

विल्वपत्रैर्महाहानिः पुत्रशोककुलक्षयम् ।
मारुतं मृत्युदं भद्रे शोकसन्तापकारकम् ॥ १४ ॥
उन्मत्तेन कुलोत्पादं शर्वरी च श्रियापहा ।
मलिनं दुःखदं प्रोक्तं कृमियुक्तं महद्भयम् ॥ १५ ॥
शङ्किता केशसंयुक्तं बन्धुहानिं करोति तत् ।
तस्माद्देवि प्रयत्नेन शुभैः पुष्पैः प्रपूजयेत् ॥ १६ ॥

अथोत्तराम्नायस्य महाकालसंहितायाम्—

शिरीषैः कर्णिकारैश्च चम्पकैः कोविदारकैः ।
वकुलैश्चैवमन्दारैः कुन्दपुष्पैः कुरुण्टकैः ॥ १७ ॥

---

१. कुसुम्भकिंशुकैर्देवि वश्यमाकृष्टिकारके। इति मूले खपुस्तके च पाठः ।
२. महालक्ष्मीप्रदौ पुष्पौ पुन्नागनागकेशरौ इति मातृकासु पाठः ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

लताभिर्ब्रह्मवृक्षस्य मृदुदूर्वाङ्कुरैरपि ।
काञ्चनारैरशोकैश्च पुन्नागैः केतकीदलैः ॥ १८ ॥
शेफालिकाभिर्यूथीभिर्जातीभिर्दमनैरपि ।
शतपत्रैर्मल्लिकाभिरम्लानैर्बन्धुजीवकैः ॥ १९ ॥
झिण्टीभिश्च जवापुष्पैः करवीरैश्च किंशुकैः ।
पारिजातैः पाटलैश्च पद्मैर्नीलोत्पलैरपि ॥ २० ॥
माधवीभिर्मरुवकैरपराजितया अपि ।
अश्वनैश्च कदम्बैश्च द्रोणपुष्पैः सकेसरैः ॥ २१ ॥
अर्चयेत् कुसुमैरेतैर्देवीं साधकसत्तमः ।

तथा—

विल्वपत्रं यथाप्रीतिकरं देव्या वरानने ॥ २२ ॥
न तथान्यत् किञ्चिदस्ति पुष्पेषु प्रीतिकारकम् ।
अतो यत्नेन दातव्यं विल्वपत्रं त्रिपत्रयुक् ॥ २३ ॥

अथ नैमित्तिके । तथा—

प्राचुर्यं वकुलानां हि वैशाखे मासि कारयेत् ।
नागकेशरपुष्पाणां ज्येष्ठ आधिक्यमाचरेत् ॥ २४ ॥
आषाढे तु प्रकर्तव्यः करवीरस्य संचयः ।
चम्पकोत्पलपद्मानां भूयस्त्वं नभसीष्यते ॥ २५ ॥
बाहुल्यं लोध्रपुष्पस्य मासि भाद्रपदे चरेत् ।
भूयिष्ठधा विधातव्या बन्धूकस्याश्विने तथा ॥ २६ ॥
अगस्त्यकुसुमानां हि भूरितां कार्तिके चरेत् ।
आधिक्यं विल्वपत्राणां मार्गशीर्षे समाचरेत् ॥ २७ ॥
पौषे दूर्वाङ्कुराणां हि सन्दोहोऽतिफलप्रदः ।
कुन्दस्तोमो माघमासि सर्वकल्याणकारकः ॥ २८ ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

फाल्गुने माधवीपुष्पं सर्वसिद्धिविधायकम् ।
चैत्रेऽशोकस्य कलिका कलिकालविनाशिनी ॥ २९ ॥

मालती यूथिका चैव दमनं कर्णिकारकम् ।
कुरुण्टकं कुवरकमम्लानं पाटला तथा ॥ ३० ॥

नवमालिकार्कपुष्पं च तथा चैवातिमुक्तकः ।
एकादशैतानि सदा कुसुमानि वरानने ॥ ३१ ॥

देयानि जदगम्बायै नरैर्नैमित्तिकार्चने ॥ ३१½ ॥

अथ काम्ये । तथाचोक्तं हाहारावतन्त्रे—

मालतीकुसुमैर्देवि वागीशत्वप्रदायिका ॥ ३२ ॥
वशगाः स्युर्महीपाला जातीपुष्पैर्न संशयः ।
मेधाः स्युर्यूथिकाभिश्च नृपत्वं नागकेशरैः ॥ ३३ ॥

माधवीभिर्महीलाभो हेमलाभश्च चम्पकैः ।
अतिमुक्तेर्बुद्धिवृद्धिर्मल्लिकाभिर्धनागमः ॥ ३४ ॥

कुन्दैः कीर्तिमवाप्नोति बन्धूकैर्बान्धवं प्रिये ।
जपापुष्पेण रिपवः संक्षयं यान्ति तत्क्षणात् ॥ ३५ ॥

पद्मैरायुरवाप्नोति कुमुदैः कविताभवेत् ।
कदम्बैर्व्याधिनाशः स्यादम्लानैर्बुद्धिभाग्भवेत् ॥ ३६ ॥

जयप्राप्तिर्मरुवकैर्गजलाभः कुरुण्टकैः ।
तथापराजिता पुष्पैर्भवेत् सर्वाङ्गसुन्दरः ॥ ३७ ॥

शेफालिकाप्रसूनेन पुत्रलाभः प्रदृश्यते ।
शोकहानिरशोकेन बकुलैः कुलमान्यता ॥ ३८ ॥
दूर्वया धनधान्यानि शाल्मल्या शत्रवः क्षयाः ।
द्रोणपुष्पेणान्नलाभो वकपुष्पैर्धनागमः ॥ ३९ ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

राज्यलाभश्च पुन्नागैः कर्णिकारैर्बहून्नतिः ।
दीर्घायुष्ट्वं पटोलेन तगरैः सर्वमान्यता ॥ ४० ॥
पलाशकुसुमैर्देवि बहुगोऽजाविकारकम्[१] ।
शिरीषपुष्पैः प्रमदा जयन्त्या च जयं श्रियः ॥ ४१ ॥
करवीरैर्मन्त्रसिद्धिर्बिल्वपत्रैः परांगतिम् ।
सात्त्विक्यां कामनायां तु सितपुष्पं प्रशस्यते ॥ ४२ ॥
उच्चाटने वशीकारे प्रीतये वैरिणां जये ।
गन्धपुष्पविशेषेण कर्तव्यं लोहितं सदा ॥ ४३ ॥
मोहने कामिनी लाभे पीतमेवाभयं मतम् ।
कृत्वाभिचारे द्वेषे च मारणे चासितं द्वयम् ॥ ४४ ॥

भावचूडामणौ—

दत्ते चैव जपापुष्पे पद्मवस्त्रफलं लभेत् ।
ब्रह्महत्यादिकं पापं क्षणान्नस्यति निश्चितम् ॥ ४५ ॥
अपरायास्तु[१] माहात्म्यं मया वक्तुं न शक्यते ।
श्वेताया द्विगुणं पुण्यं दद्यात् कृष्णापराजिता ॥ ४६ ॥

तथा—

अपराकुन्दमध्ये तु कुलस्थानं मनोहरम् ।
हयारिकुसुमे देवि स्वयमस्ति सदाशिवः ॥ ४७ ॥
तन्मध्ये लघुमादाय[२] पुष्पमध्ये तु चन्दनम् ।
रक्तकुङ्कुमरागं वा कृत्वा तत्र शिवात्मकम् ॥ ४८ ॥

---

१. बहुगोजाविकारकः इति मातृकासु ।
१. अपरायाः-अपराजिताया इत्यर्थः ।
२. रघुमादाय इति मातृकासु ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

योजयेच्छिवशक्त्योश्च ऐक्यं संभावयन् धिया ।
क्षणं विचिन्त्य तत्रैव संचिन्त्यापरमेश्वरीम् ॥ ४९ ॥
यजेत देवकुण्डोत्थं द्रव्यं परमदुर्लभम् ।
अमृतादधिकं ज्ञेयमेतद् द्रव्यं तु साधकैः ॥ ५० ॥

अथ निषिद्धानि । **महाकालसंहितायाम्—**

तुलसीभिरपामार्गैर्धूस्तूरैः सिन्धुवारकैः ।
अर्कपत्रैर्वासकैश्च नैव देवीं प्रपूजयेत् ॥ ५१ ॥
देवीमित्यसितेत्यर्थः । तत्प्रकरणोक्तत्वात् ।

अथ दक्षिणकाल्याः । **कालीतन्त्रे—**

नानोपहारवलिभिर्नानापुष्पैर्मनोरमैः ।
अपामार्गदलैः पुष्पैः तुलसीवर्जितैः शुभैः ॥ ५२ ॥
पूजनीया सदा भक्त्या नृणां शीघ्रफलाप्तये ।

तथा—

सुगन्धैः श्वेतलौहित्यैः कुसुमैरर्चयेत् कुलैः ॥ ५३ ॥
विल्वैर्मरुवकाद्यैश्च तुलसीवर्जितैः शुभैः ।
द्रोणपुष्पैर्विशेषेण वज्रपुष्पेण मिश्रितैः ॥ ५४ ॥

मुण्डमालातन्त्रे—

पुष्पाण्यपि तथा दद्याद्रक्तकृष्णासितानि च ।
श्वेतपुष्पं जपापुष्पं करवीरं तथा प्रिये ॥ ५५ ॥
तगरं मालती जाती सेवन्ती यूथिका तथा ।
धुस्तूराशोकवकुलं श्वेताकृष्णापराजिता ॥ ५६ ॥
वकपुष्पं विल्वपत्रं चम्पकं नागकेशरम् ।
मल्लिका झिण्टिका काञ्ची रक्तं यत् परिकीर्तितम् ॥ ५७ ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

अर्कपुष्पं कोकनदं वर्व्वरं च प्रिये सदा ।
अष्टम्यां च विशेषेण तुष्टा भवति कालिका ॥ ५८ ॥
पद्मपुष्पेण रक्तेन सन्तुष्टा सर्वदेवता ।
कृष्णा वा यदि वा शुक्ला कालिकावरदा भवेत् ॥ ५९ ॥
श्मशानधुस्तुरेणैव तुष्टा धूमावती परा ।
वन्यपुष्पैश्च विविधैस्तुष्टा भवति सर्वदा ॥ ६० ॥
आमलक्यास्तु पत्रेण तुष्टा भवति पार्वती ॥ ६०½ ॥

शक्तियामले—

सावित्रीं च भवानीं च दुर्गादेवीं सरस्वतीम् ।
योऽर्चयेत् तुलसीपत्रैः सर्वकामः सुसिद्ध्यति ॥ ६१½ ॥

अथ नीलसरस्वत्याः । तथाचोक्तं नीलतन्त्रे—

अष्टम्यां च चतुर्दश्यां पूजयेच्च यथाविधि ॥ ६२ ॥
आज्ञासिद्धिमवाप्नोति जपापुष्पं च वर्व्वरी ।
चन्दनं चार्ककुसुमं दद्यात् श्वेतापराजिता ॥ ६३ ॥
बन्धूकमालया तुष्येत् तथा छागप्रदानवत् ।
अर्घ्यं दद्यात् प्रयत्नेन नित्यपूजासु सर्वदा ॥ ६४ ॥

मत्स्यसूक्ते—

पुष्पं श्रेष्ठं रक्तकोकं बन्धूकं शतपत्रकम् ।
वर्व्वरद्वितयं चैव कर्णिकारद्वयं तथा ॥ ६५ ॥
वकमन्दारचूतानि करवीराणि शस्यते ।
सन्धिकात्रितयं जाती क्षौमपुष्पं जयन्तिका ॥ ६६ ॥
विल्वपत्रं कुरवकं मुनिपुष्पं च केसरम् ।
वासन्तीद्वितयं चैव काशपुष्पं मरूवकम् ॥ ६७ ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

दमनं च लवङ्गं च यूथी शेफालिका तथा ।
सुगन्धिश्वेतलौहित्यैः कुसुमैरर्चयेत् कुलैः ॥ ६८ ॥

कुलैरिति गुरुगम्यम् ।

अथ निषिद्धानि । त्रिशक्तिरत्ने—

तुलसीमालतीवर्ज्यं पुष्पं दद्यात् प्रसन्नधीः ।

कुलचूडामणावपि—

वर्जयेन्मालतीपुष्पं वर्जयेत् तुलसीदलम् ॥ ६९ ॥

अथोद्र्ध्वाम्नाये । वामकेश्वरतन्त्रे—

मन्दारं पारिजातञ्च वश्य-सौभाग्यदायकम् ।
पीतजातीसर्वकामं विशेषे स्तम्भने हितम् ॥ ७० ॥

खर्जूरपुष्पं जाती च कुन्दं श्रीवृद्धिदायकम् ।
बन्धूकं मोक्षसौभाग्यं जपा च त्रिपुराप्रिया ॥ ७१ ॥
उत्पलं धनवृद्धिश्च पद्मं पौष्टिकमेव च ।
पुन्नागं सर्वसम्पत्तिं वभ्रूकं धनहानिकम् ॥ ७२ ॥
कह्लारोल्लासवृद्धिं च केतकीं च विवर्जयेत् ।
मुहुश्च निष्फलं ज्ञेयं मल्लिका दुःखदायिका ॥ ७३ ॥
चम्पकः पुत्रकामस्तु त्रिसन्ध्या दुःखमोचका ।
द्रोणं मोक्षमवाप्नोति सेवन्ती सर्वसिद्धिदा ॥ ७४ ॥
शेफालिका जयकरी कर्णिका वृद्धिदायिका ।
कुमुदं प्रीतिदं चैव सुदर्शनधनप्रदम् ॥ ७५ ॥
कुरुण्टसिद्धिसौभाग्यं नीलद्रव्यं तु हानिकम् ।
दमनं सर्वसम्पत्तिं विल्वपत्रं पराप्रियम् ॥ ७६ ॥

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

निर्गन्धोत्कटगन्धं तु वर्जयेत् चक्रपूजने ।
कृष्णापराजिता मृत्युः पूतमाली तथैव च ॥ ७७ ॥
मल्लिका नाम संज्ञाया दुःखदा मृत्युदा सदा ।
आधिव्याधिप्रदा[1] चैव केशयुक्तं च हानिकम् ॥ ७८ ॥
कृमियुक्तमहाभीतिराजदण्डमहद्भयम् ।
इत्येतत् पुष्पमाहात्म्यं ज्ञात्वा श्रीत्रिपुरां यजेत् ॥ ७९ ॥

ज्ञानार्णवे—

जपापुष्पैर्महेशानि पूर्ववत् पूजयेच्छिवाम् ।
मासमात्रेण हन्त्येव पातकं शतजन्मकम् ॥ ८० ॥
सौभाग्यवान् भवेन्मन्त्री त्रिपुरायाः प्रसादतः ।
श्वेतपुष्पैर्महेशानि महद्भिः पूजयेन्नरः ॥ ८१ ॥
नाशयेत् पातकं सर्वं त्रिंशज्जन्मभवं प्रिये ।
मासमात्रेण सकलं मोक्षं तस्य करे स्थितम् ॥ ८२ ॥
वन्धूककुसुमैर्देवीं मासमात्रं प्रपूजयेत् ।
त्रिलोकं[2] वशगं तस्य सर्वपापं दहेद् बुधः ॥ ८३ ॥
विल्वपत्रैश्च जलजैः सत्यैश्च परिपूजयेत् ।
पूर्ववत् परमेशानि मासमात्रं प्रसन्नधीः ॥ ८४ ॥
समृद्धिमान् भवेन्मन्त्री सर्वपापं हरेत् सदा ।
मल्लिका मालती जाती कुन्दैश्च शतपत्रकैः ॥ ८५ ॥
श्वेतोत्पलसुशीतैश्च पूजयेन्मासमात्रकम् ।
कुलाचारक्रमेणैव पातकं शतजन्मजम् ॥ ८६ ॥

---

१. अतिव्याधि इति मूले ।

२. त्रिलोकी वशगातस्येति युक्तः पाठः ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

ब्रह्महत्यादिजनितं नाशयेन्नात्र संशयः ।
मुक्तिस्तस्य करे देवि वाचा जीवसमो भवेत् ॥ ८७ ॥

अगस्त्य-प्राण-बन्धूक-जपा-रक्तोत्पलैः प्रिये ।
पूर्वक्रमेण संपूज्य मासमेकं प्रसन्नधीः ॥ ८८ ॥

पातकं नाशयेन्मन्त्री साक्षात्कामसमो भवेत् ।
चम्पकैः पाटलैर्देवि वकुलैर्नागकेशरैः ॥ ८९ ॥

वंकुलैः सिन्धुवारैश्च पूजयेत् पूर्ववत् क्रमात् ।
सौभाग्यमतुलं तस्य मासमात्रेण जायते ॥ ९० ॥
पापं विनाशयेद् देवि यदि जन्मसहस्रकम् ॥ ९०½ ॥

अथ निषिद्धानि । तत्रैव--

पुष्पैः पर्युषितैर्देवि नार्चयेत्[1] स्वर्णकैरपि ।
निर्माल्यभूतैः कुसुमैरुच्छिष्टैः परमेश्वरि ॥ ९१½ ॥

वाराहीतन्त्रे--

पलाशकाशकुसुमैरर्चनं दूरतस्त्यजेत् ॥ ९२ ॥
धात्री तमालजैः पत्रैस्तुलसी द्वितयैस्तथा ।
पूजनात् पातकीव स्यादिन्द्रस्यापि हरेच्छ्रियम् ॥ ९३ ॥
त्रिपुरा पूजने वर्ज्या तुलसी सर्वदा बुधैः ।
तुलसीघ्राणमात्रेण क्रुद्धा भवति सुन्दरी ॥ ९४ ॥

कौलालवीये--

भैरवी-सुन्दरी-तारा-ब्रह्म-विष्णु-विवस्वताम् ।
तुलसीवर्जिता पूजा सा पूजाऽविफला भवेत् ॥ ९५ ॥

---

१. नार्चयेत् इति क ख पुस्तकयोः ।

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

अत्र भैरवी-सुन्दरी-तारा-प्रसङ्गे ब्रह्मविष्णुविवस्वतां पूजा तुलसीवर्जिता अविफला सफलेत्यर्थः। न तु केवलब्रह्मविष्णुविवस्वदादिपूजने। तन्त्रसारकार-स्वरसोऽप्येवम्। तुलसीनिषेधस्तु दिव्यवीरपरमिति ताराभक्तिसुधार्णवे। तच्चिन्त्यम्, दिव्यवीरयोरेव निषिद्धप्रतिपादकवचनाभावात्।

इति श्रीपुष्पचिन्तामणौ चतुर्थः प्रकाशः समाप्तः

शुभमस्तु सर्वदा

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

THE PUṢPACINTĀMAṆI

A Digest

The Puṣpacintāmaṇi or "Flowers in Worship" has been compiled by incorporating the relevant passages from different *Tantras, Purāṇas, the Mahābhārata, the Mahākāla Saṁhitā, Puṣpamālā* etc. The work consists of four chapters which are briefly summarised below.

The first chapter relates mainly to the flowers for the worship of Lord Śiva. It starts with a description of flowers in general. There are detailed discussions regarding the rewards for offering flowers to deities, specially to Lord Śiva with a particular reference to the specific flowers to be offered as well as to those prohibited. In this connection, there is a mention of flowers in general and in particular, the reward of offering specific flowers in a specific month and the comparative merits of the flowers. The reward for offering the fragrant wreaths and the leaves of the *Bilva*, the *Śamī*, the *Bhṛṅgarāja*, the Aṭarūṣa, the Tamāla etc., together with the method of offering the flowers and leaves to Lord Śiva is mentioned.

In the optional (Kāmya) worship of Siva, the reward for offering specific flowers and in His usual (Nitya) worship the prohibited ones are described. Though in the devotional worship there is no prohibition of offering any flower whatsoever, yet the impure (Upahata) flowers and those collected by a person after he has had his bath as well as the stale (Paryu-

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

ṣita) flowers and leaves should never be offered. But as the leaves of the *Tulasī* and *Bilva* as well as the *Agastya* and flowers from water-plants do not get stale in course of five days, no such prohibition has been attachad to them. According to the *Śivāgama*, there is no such prohibition against flowers purchased from the florist either. Here ends the first chapter.

The flowers worth offering to Lord Viṣṇu and the nine planets form the theme of the second chapter. There are usual descriptions of the flowers of three categories : general, particular and auspicious, along with their comparative merits and demerits for the worship of Viṣṇu. The flower Jasmine (Jātī) has been highly eulogised as Lord Viṣṇu's special favourite, and the reward for offering the wreath composed of one thousand such flowers is also mentioned. There are additional discussions in accordance with the *Gautamīya* Tantra, and *the Skanda Pūrāṇa* regarding the specific and prohibited flowers for Viṣṇu-worship. Similarly, these aspects of flowers for the Sun-worship have been incorporated here from the *Bhaviṣya Purāṇa*. It also describes the reward of offering the flowers to the Sun at a particular hour of the day, along with the prohibitory things in the worship of the particular deity. In course of a usual discussion regarding the specific and prohibitory flowers, it has been mentioned that *Akṣata* and *Dhustūra* should never be offered to Viṣṇu, nor *Tulasī* to *Vināyaka*, *Dūrvā* to *Durgā*, *Tagara* and *Bilvapatra* to the Sun, nor Kunda to Siva. The chapter concludes with a description of the favourite flowers for the nine planets and the flowers suited to and barred from obsequial rites.

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

The third chapter likewise deals with the three categories of flowers—general, specific and auspicious-meant for the worship of the goddess Durgā along with a description of three kinds of garlands, viz, *Raikṣikā*, *Sādhāraṇī* and *Vanamālā*. There are interesting details too regarding the merits of offering specific flowers in a particular season or month of the year. The chapter concludes with a discourse on flowers forbidden in the worship of Devī.

The last chapter too contains the usual information regarding different aspects and virtues of flowers as in the earlier chapter in respect of the worships of SiṅhāsanaVidyā, Dakṣiṇakālī, NīlaSaraswatī and Tripurasundarī. In course of giving additional facts regarding the occasional (Naimittika) worship, it has been enjoined that in the worship of the goddess Durgā, one should offer plentiful *Vakulas*, in the month of Vaisākh, much more Nāgakesaras in Jyeṣṭha, ample *Karvīras* in Aṣāḍha abundant *Campakas* and lotuses in Śrāvaṇa, plentiful *Lodhras*, *Bandhūkas*, *Agastyas Bilvapatras*, *Dūrvās*, *Kundas Mādhavīs* and Aśokas in the month of Bhādra, Āświna, Kārtika, Agrahaṇa, Pauṣa, Māgha, Fālguna and Caitra respectively.

Details of flower-offerings and their rewards have been compiled from different sources regarding the optional (Kāmya) worship of the deities mentioned above. In this chapter can also be found the usual description regarding the impure (Upahata) and stale (Paryuṣita) flowers in all their aspects as mentioned in the previous chapter. While the merits of

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

the flower Aparājitā are highly praised, *Tulasī, Apāmārga, Dhustūra, Sindhuvāra,* and the leaves of Arka and Vāsaka are forbidden in the worship of Devīs. There is an interesting piece of information regarding the goddess Dhūmāvatī's special delight in accepting an offering of the flower Dhustūra grown on a cemetary and Pārvatī's in Dhātrī-leaves.

Discussing the particular features of the auspicious flowers in the worship of Nīla Saraswatī and Tripurasundarī the work closes with a solemn warning that Tulasī-leaves should never be offered in their worship as also in the worship of Brahmā, Viṣṇu and the Sun, if Bhairavī, Tripurasundarī and Tārā are also worshipped along with them.

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

पुष्पचिन्तामणौ निर्दिष्टानाम्

उद्धृतप्रकरणानां च ग्रन्थानां नामानि

१. आचारचिन्तामणिः
२. उत्तराम्नायः
३. उत्तरोत्तरम्
४ ऊर्द्ध्वाम्नायः
५. कालिकापुराणम्
६. कुलचूडामणिः
७. कोलालवीयम्
८. गौतमीयतन्त्रम्
९. ज्ञानमाला
१०. ज्ञानार्णवतन्त्रम्
११. त्रिशक्तिरत्नम्
१२. देवीपुराणम्
१३. नरसिंहपुराणम्
१४. नारदीयराक्षसीशपथम्
१५. नीलतन्त्रम्
१६. पश्चिमाम्नायः
१७. पुष्पमाला
१८. भविष्यपुराणम्
१९. भारतम्
२०. भावचूडामणिः

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

२१. मत्स्यसूक्तम्

२२. मनुस्मृतिः

२३. मन्थानभैरवतन्त्रम्

२४. महाकालसंहिता

२५. यामलम्

२६. लिङ्गपुराणम्

२७. वामनपुराणम्

२८. वामकेश्वरतन्त्रम्

२९. वाराहीतन्त्रम्

३०. विष्णुपुराणम्

३१. शक्तियामलतन्त्रम्

३२. शातातपीयम्

३३. शिवगीता

३४. शिवधर्मः

३५. शिवधर्मसंग्रहः

३६. शिवपुराणम्

३७. शिवरहस्यम्

३८. शिवागमः

३९. स्कन्दोक्तवैष्णवामृतम्

४०. हारीतम्

४१. हाहारावतन्त्रम्

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

पुष्पचिन्तामणौ निर्दिष्टानां पुष्पाणामर्थसहिता
अनुक्रमणिका

अगस्त्यम्	अगस्त्य-फूल	
	वक-पुष्प	
अटरुषः	वाकस	
अटरूषः	,,	
अतिमुक्तकम्	तिनिस, वञ्जुल,	Tinis, Clitoria.
	माधवीपुष्प	
अतिमुक्ति	,, ,,	,, ,,
अपरा	अपराजिता	Clitoria.
अपराजिता	,,	,,
अपामार्गः	चिरचिरी	Chyranthesas Pera.
अम्लानम्	कटसरैया, दुपहरिया	
अर्कः	आक	Swallow wort.
अर्जुनम्	अर्जुन का फूल	Kahūa.
	करवीर	
अशनम्	पीत साल वृक्ष का फूल	
असनम्	,, ,,	
अशोकम्	अशोक-पुष्प	Ashoka flower.
अश्वकर्णः	शाल	Sal.
आमलकम्	आँवला	Emblic myrobalan.
आमलकी	आँवला	,, ,,

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

आम्रातकम्	अमड़ा	Spondias.
उत्पलम्	कमल	Lotus.
उदुम्बरम्	गूलर	Glomerous fig-tree.
उन्मत्तम्	धतूर	The thorn apple.
उशीरम्	खस	A fragrant grass.
ऋषिपुष्पी	अगस्त्यपुष्प, वकपुष्प	Agati Grandiflora.
कदम्बम्	कदम्ब	Kadumb flower.
कपित्थम्	कत्घ, कठवेल	Wood apple.
कमलम्	कमल	Lotus.
करजेन्द्रः	करज	Caranj.
करञ्जम्	करज, रक्तमाल	"
करवीरम्	करवीर, कनैल	Oleander.
कर्णिकारः	कनैल, कठचम्पा	The flower of petros-Permum.
	कनियार का फूल	Canyar.
कर्पूरदमकम्	कर्पूरदमक	
कह्लारम्	श्वेत-कमल	A white water lily.
काञ्ची	गुञ्जा	The plant Abrus precatorius.
काञ्चनारजम्	कचनार	The flower of kovider, Mountain Obony.
काशः	काँस का फूल	The Kash flower.
काष्ठपाटला	सितपाटलिका	The flower of a plant by that name.

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

किङ्किरातः	अशोक, कटसरैया	Red or yellow amaranth.
किंशुकम्	पलाश	Butea frondosa.
कुङ्कुमम्	केसर	Saffron.
कुटजम्	कोरैया, इन्द्रजौ, कमल, अगस्त्य	
कुन्दम्	माध्य	Many flowered Jasmine.
कुब्जकम्	एक पुष्प-विशेष, वृन्त-पुष्प	
कुमुदम्	कुमुद अपामार्ग	Lily.
कुम्भिः	गनियारी, पुडइन, पाँडर	Kayaphal.
कुरञ्जम,	पीली झिण्टी	A yellow amaranth.
कुरण्टकः	पीली कटसरैया पीली झिण्टी	A yellow amaranth.
कुरुण्टकः	,,	,,
कुरण्डम्	पीली कटसरैया	,,
कुरवकम्	लाल कटसरैया लाल झिण्टी	A red amaranth.
कुरुवकम्	,,	,,
कुशः	कुश	Sacrificial grass.
कुशेशयम्	कमल	Lotus.
कुसुमम्	पुष्प	Flower.
कुसुम्भम्	कुसुम, केसर	Saffron.

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

कृष्णला	करेजनी-गुञ्जा	Abrus Precatorius.
केतकी	केवड़ा	A flower of the Ketaka plant.
केन्द्रा	तिन्दुक का फूल गालव का फूल	
केशरम्	भालसरी	Mulsare, a fragrant flower.
	केसर	Saffron.
कोकनम्	एक पुष्प-विशेष	
कोकनदम्	लाल-कमल लाल कुमुद	The red water lily.
कोकिलाक्षम्	ताल मखाना कुलिया खाड़ा	Barleria.
कोविदारः	कचनार	Mountain Obony.
क्षौमपुष्पम्	पुष्प-विशेष .	The flower of flax.
खदिरम्	खैर	Khayar-Catechu.
खर्जूरम्	धतूरा, खजूर का फल	Phoenix Sylvestris.
खादिरम्	खदिर का पत्र	Acacia Catachu.
गङ्गापत्रिकम्	सुगन्धा, गन्धपत्रिक	Name of a flower of that plant.
गन्धारः	गन्धारलता का फूल	A flower of a fragrant creeper.
गिरिकर्णिका	अपराजिता	Cletoria.
गिरिमल्लिका	कोरैया, कुटज	Kutaja.

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

गिरिशालिनी	कुटज	„
गुञ्जा	करेजनी	A small shrub of that name.
गुञ्जला	„	„
ग्रामशिखी	ग्रामशिखी	
चम्पकम्	चम्पा	A yellow fragrant flower.
चारुपुरम्	चारुपुर	
चूतम्	आम	Mango.
चोलिकम्	जीवकपुष्प, चोलपुष्प	
जपा	ओड़हुल	The china rose.
जवा	„	„
जम्बु	„	The rose apple.
जम्बुवनम्	श्वेत जवापुष्प	white Jave.
जम्बूटः	जम्बूट	
जम्बूलम्	केतकी, केवड़ा	The flower of ketaka.
जयन्ती	जैंति, गनियार	Jayanti.
	अपराजिता	
	हल्दी	Turmerie.
जया	जयन्ती, गनियार	Jayanti.
जलजम्	कमल	Lotus.
जातिः	चमेली	Great flowered Jasmine.

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

जाती	”	”
ज्योत्स्नाकरी	ज्योत्स्नी, पटोलिका, परवल	
झिण्टिका	कटसरैया	Jhinti.
झिण्टी	”	Barleria Cristata.
तगरम्	तगर	
तमालम्	तमालपुष्प	Flower of the dark-basked tree
तिलकम्-मरुवक	तमाल,	Tilaka

वसन्त में होने वाला एक फूल

तुलसी	तुलसी	Tulasi
त्रिसन्ध्या	फगुनियाँ फूल, सान्ध्यकुसुमा	
दमनकम्	कुन्दपुष्प	Many flowered Jasmine
दर्भः	कुश	Saerificial grass
दूर्वा	दूब	Bent grass
देवपत्रम्	देवपर्ण	A devine leaf
द्रोणः	द्रोणपुष्प	A kind of flower white in colour
धातकी	धावा फूल या धव का फूल	Lythrum
धत्तूरकम्	धतूर का फूल	Flower of the thorn apple

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

धुस्तूरम्	धतूर का फूल	
नन्द्यावर्तम्	तगर का फूल	
नवमल्लिका	वसन्ती नेवार	Double Jasmine
नवमालिका	,,	,,
नागम्	नागकेशर	Nagkesar
नागकेशरम्	केशर	Nagkesar, Saffron
निम्बपुष्पम्	नीम का फूल, मन्दार का फूल	A flower of that name
नीलोत्पलम्	नीलकमल	The blue lotus
पङ्कजम्	कमल	Lotus
पटोलम्	परवल का फूल	The flower of paraval
पद्मम्	कमल	Lotus
पलाशः	किंशुक	Buteafrondosa
पाटलम्	पाँड़रि	Trumpet flower
पाटला	,,	Rose coloured flower
पाटली	,,	Rose blossom of the Bignomia
पारिभद्रम्	बकायन, फरहद	Coral
	देवदारु पुष्प	Deodar
पावन्तिः पावन्ती	तुलसी	Tulasī
पुन्नागम्	केशर, पाटल	Nagkesar
पूतमाली	पूतमाली	
प्राणः, प्राणकः	जीवकपुष्प	

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

फलिनी	प्रियंगु	Priyangu
	अग्निशिखा,	
	इन्द्रपुष्प	
बकः	एकपुष्पविशेष, अगस्त्य	
बकुलः	मौलेसरी	Mulesari
बन्धूकः	बन्धुजीवक, दुपहरिया,	
	मधुरी फूल	A blood red flower
बहुला	बड़ी इलायची	Large cardamom
बाकुची	बकुची	Somraj
बाणः	कालीकटसरैया	Black katasaraiya
बाणी	,,	,,
बालः	एक प्रकार की जूही	A kind of Jasmine
बुकम्	बकहुलगुम्मा	
बृहत् बृहती	रेगली	A sort of prickly night shade
भण्डी	मजीठ	Madder
भान्तिकम्	मजीठ या भाँटि	
भृङ्गरजः	भृङ्गराज,	Bhringraj
भृङ्गराजः	भगेरिया	,,
मत्तगिरिज	मत्तगिरिज	
मदन्ती	धतूर	Flower of the thorn apple
मदन्तिका	,,	

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

मन्दारः	पारिजात	A divine flower
	बफायन, फरहद	Coral
	आक	Swallow wort
मरुवकम्	मरुवा	Marua
मल्लिका	छोटी बेली	Arabian Jasmiue
मल्ली	"	"
मान्दिनी	मान्दिनी	
मारुतम्	मारुत	
मालती	चमेली	Great flowered Jasmine
मुद्गरम्	मुद्गर	Flower of a species of grass
मुनिपुष्पम्	अगस्त्यपुष्प, वकपुष्प	
यूथिका	जूही	Jasmine
यूथी	"	"
रक्तकोकम्	लालकोकनद, कमल	Red lotus
रक्ताब्जम्	लालकमल	Red lotus
रक्ताश्वमारकम्	लालकरवीर	Red oleander
रक्तोत्पलम्	लालकमल	Red lotus
रसालः	आम	Mango
रुद्रजटी	जटाधारी, महाजटा	
लघुः	पृक्का नामक ओषधिविशेष	
लवङ्गम्	लवंग का फूल	The flower of the clove tree

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

लोध्रः	लोध	A red or white flower of that name, Bassia-latifolia
वकम्	अगस्त्यपुष्प	Agati Grandifiora
वकुलम्	वकुल का फूल	
वंकुली	बकुल	Bakul flower
वचकुन्दम्	वचकुन्द	The Flower of orris root
वज्रपुष्पम्	तिल का फूल	The blossom of sesame
वनजम्	कमलम्	Lotus
वभ्रूकम्	वभ्रूक	
वर्वरम्	वर्वर	
बातकः	सनपटुआ अपराजिता	Asan parni
वारुणी	एक प्रकार की दूब	A kind of Dūrvā
वासकम्	वाकस	justica
वासन्ती	माधवी	A kind of Jasmine
विचकिलम्	मदन, एक तरह की चमेली	A kind of jasmine
विजयः	विजय	
विल्वपत्रम्	बेल का पत्र	
वुकम्	वकहुलगुम्मा	
वैभीतिकम्	बहेड़े का फूल	The Flower of the tree Terminalia Bellerica

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

व्याघ्री	व्याघ्री	
शङ्किता	एक गन्ध द्रव्यविशेष	
शङ्कुपुष्पम्	साखू का पुष्प	
शणपुष्पम्	सनइ	Crotalaria
शनपत्रम्	कमल	Lotus
शमी	वागुजी, शिंपा, सैनी	
शर्वरी	हल्दी	
शाद्वलम्	हरीदूब	
शालिपुष्पम्	धान्यपुष्प	Flower of Sali
शाल्मली	सेमर का पुष्प	Flower of silk cotton
शिखिनी	जटाधारी का पुष्प	
शिरीषः	सिरिस का फूल	Acasia Sirissa
शिंशिपापुष्पम्	अशोक का पुष्प, शीशम का पुष्प	
शेफालिका	श्रृङ्गहार, सुवहा, निर्गुण्डी, नील सिन्धुवार	Shephalika
श्यामा	दहिगन, प्रियंगु, निशोथकाला	Shyama
सरसिजम्	कमल	Lotus
सर्जम्	पीतशाल-वृक्ष का पुष्प	Flowcr of red sala
सहकार मंजरी	आम की मंजरी	Clusters of mango
सिन्दूरी	धावाफूल, धातकी	Lyttrum
सिन्धुवारः	निर्गुण्डी, सिनुआर	Vitex Negunde
सिंहास्यकम्	वाकस, कचनार	justicia
सेवन्ती	सफेद गुलाब	White rose

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

सौगन्धिकम्	कल्हार	A white or blue water lily
	गुलाबकाड़ा	A fragrant flower
स्वर्णकम्	शिरीष का फूल	A well known flower regarding delieacy
हयारिकुसुमम्	हयमारक, करवीर	Oleander, Nerium Odorum
हृदया	जाती	Jasmine
हेमजाती	हेमयूथी, स्वर्णयूथिका	Golden jasmine or yellow jasmine
हेमरूपकम्	हेमरूपक	

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

Prof. Madhav Prasad Lamichhane Collection, Kathmandu, Nepal